डिबिया

– बृजमोहन वत्सल

घर के दरवाजे पर दोनों तरफ बने आलों में से एक में हर शाम को एक डिबिया जलती थी। वही डिबिया जो तिहत्तर साल की मंगलो ने अपने हाथों से बनायी थी। कूड़े में फैंकी गयी छोटी शीशी जिसका ढक्कन ऐल्यूमिनीयम का था, उठा लायी थी मंगलो। सोचा था एक डिबिया घर के अंदर जलती ही है, एक और हो जाएगी तो दरवाजे के बाहरी आले में रखेगी तो गली में भी थोड़ा उजाला हो जाएगा। मंगलो का छोटा सा घर पीली मिट्टी से पुता हुआ था और चार दीवारें घर के छप्पर को थामे हुई थी। लकड़ी का पुराना दरवाजा जो पतासे की कीलों से बना हुआ था, के बाहर ही गली का मोड़ था जिसमें उजाला करने की चाहत में, कूड़े से वो छोटी काँच की शीशी उठा लायी थी मंगलो। सड़क से करीब अस्सी किलोमीटर दूर बसा था मंगलो का छोटा सा मौजी नामक गाँव जिसमें करीब तीस घर थे। सड़क के पास बसे गावों में बिजली थी जो पूरे दिन में तकरीबन आठ घंटे तक आ ही जाती थी। मंगलो के दोनों बेटे मोहक और सुबल बिजली के चलते मौजी गाँव छोड़के सड़क के किनारे बसे गाँव तारपुर में अपने-अपने परिवारों के साथ आके बस गए थे। मंगलो का मौजी से प्यार, जहाँ वो शादी करके मोहक और सुबल के पिता के साथ सात फेरे लेके आयी थी, उसे छोड़ने नहीं दे रहा था, इसीलिए बेटों के समझने के बाद भी वो मौजी में ही रहना चाहती थी। मौजी का उसका घर उसे जान से भी प्यार था तभी तो इतनी उम्र में भी अकेली ही रहती थी बिना अपने बेटों के, क्योंकि मंगलो के पति का बीमारी से देहांत हुए काफी साल हो गए थे।

महीने में एक बार जरूर जाती थी मंगलो अपने बेटों और पोते-पोती से मिलने और गाँव से आटे का हलवा बनाके ले जाती थी अपने पोते-पोती के लिए। कभी-कभी गाजर का हलवा भी ले जाती थी होली और दिवाली जैसे त्योहारों पर। सभी का कहना था कि हलवा मंगलो से अच्छा कोई नहीं बना सकता था और इसी हलवे के कारण सामने रहने वाले हरिया के बेटे कृष्णा जो तकरीबन सोलह साल का था, से अच्छी भली दोस्ती हो गयी थी। कृष्णा ही था जो बूढ़ी मंगलो के पास आकर बैठता था और मंगलो की उसकी बचपन से लेकर अब तक की बातें और कहानियाँ सुनता रहता था वो भी सिर्फ एक हलवे के निवाले के लिए। कृष्णा प्यार से मंगलो को दादी बुलाता था और उसकी दादी उसे बिटवा। दादी का बिटवा ही था जो दादी के लिए सरकारी नल से पानी लाके देता था और घर के बाकी सारी कामों में भी मदद करता था। कृष्णा दसवीं कक्षा में पढ़ रहा था और हमेशा स्कूल से आते ही मंगलो से मिलने जाता था, आ र बिटवा और दादी की दोस्ती ही ऐसी थी जिसमें प्यार था, हलवा था और अपनापन था।

मंगलो के पास एक बकरी थी जो दरवाजे के बाहर गड़े एक छोटे से खूँटे से बंधी रहती थी जिसे कृष्णा प्यार से राधा बुलाता था और उसके पालन-पोषण में दादी की मदद करता था। कृष्णा ही उसे कभी-कभी जंगल घुमा लता था और राधा भी छोटे पेड़ों के पत्ते बड़े चाव से खाती थी। राधा पत्ते खाती रहती थी और कृष्णा बैठे-बैठे राधा से बात करता रहता था क्योंकि कृष्णा की राधा से दोस्ती गली में रहने वाले हम-उम्र कल्लू से ज्यादा थी। कल्लू राधा को बहुत परेशान करता था जो कृष्णा को पसंद नहीं था जैसे कि कल्लू बकरी की पीठ पर बैठके टिक-टिक करके उसे चलता था। राधा उसका बोझ नहीं उठा पाती थी फिर भी दो चार कदम चलके गिर जाया करती थी। कृष्णा की कल्लू से कई बार लड़ाई भी हो गयी थी इस बात को लेके, क्योंकि राधा उसकी दोस्त ही नहीं परिवार भी थी जिसके दूध की चाय बनाके मंगलो उसे पिलाती थी।

पढ़ने में तो कृष्णा गाँव का सबसे होनहार लड़का था पर उसकी छोटी बहन लाली भी बहुत अच्छे से अपनी पढ़ाई करती थी जो आठवीं की पढ़ाई कर रही थी। लाली हमेशा अकेली ही खेलती थी क्योंकि कृष्णा या तो उसकी दादी के पास होता था या अपनी राधा के साथ। वैसे शाम में दोनों साथ ही बैठके पढ़ते थे वो भी एक डिबिया से जो हरिया ने उनके पढ़ने के लिए बनायी थी। जिसकी तरफ डिबिया होती उसको अच्छे से दिखायी देता और दूसरे को थोड़ा कम, तो वो दोनो डिबिया को एक दूसरे की तरफ खींचते रहते और लड़ते रहते थे। गाँव में बिजली ना होने की कमी का असर उनकी पढ़ाई पर भी पड़ता था पर कृष्णा अपनी लगन का पक्का था तभी तो अपनी कक्षा का मॉनिटर भी बन गया था। उसका स्कूल गाँव से दस किलोमीटर दूर नंदपुर में था, जहाँ दोनो भाई बहन पढ़ने जाते थे।

कृष्णा की दसवीं की परीक्षा आने वाली थी तो लाली हमेशा उसे चिढ़ाती रहती थी कि अब पास होके दिखाना! क्योंकि दसवीं की बोर्ड की परीक्षा होती थी जिसका सेंटर दूसरे स्कूल में पड़ता था जो काफी दूर होता था उनके स्कूल से। कभी-कभी खेल खेल में दोनो एक दूसरे से पूछा करते थे कि वो पढ़ लिखकर क्या बनेंगे। वो बस एक ही बात कहता था कि उसे अच्छा नहीं लगता मंगलो का यूँ अकेले रहना बिना उसके परिवार के और इसकी वजह है बिजली जिसके कारण उसके बेटे उससे दूर रहते हैं इसलिए वो बड़ा होके एक बिजली का खम्बा लगवाएगा ताकि उसके गाँव में भी बिजली आ सके और मंगलो के बेटे उसके पास आके रहे और उसकी देखभाल करे। छोटी उम्र में ही

बड़ी बातें करने लगा था कृष्णा और ये सब था उसकी दोस्त मंगलो के लिए उसका दादी-पोते जैसा प्यार।

शाम में टहलते हुए रास्ते में कूड़े पर जो शीशी मंगलो को मिली थी उसने उसे लाकर घर में ताख पर रख दिया। सोचा कल सुबह कृष्णा को दिखाऊँगी और नई डिबिया बनाऊँगी। सुबह उठके, काँच की शीशी हाथ में लिए, रोज की तरह कपड़े पहने, लाल रंग का घाघरा, सफेद रंग की कमीज और हल्के लाल रंग का ओन्ना सर पर रखे अपने दरवाजे पर खड़ी मंगलो ने सामने से कृष्णा को आवाज लगायी - ह्कृष्णा, बिटवा इधर तो आ!

'क्या हुआ दादी?'- कृष्णा दोड़ते हुआ आया।

'ये देख मुझे खाली शीशी मिली है'- मंगलो ने कृष्णा को खाली शीशी दिखाते हुए कहा।

'इसका क्या करोगी दादी?'-कृष्णा ने शीशी को देखते हुए बोला।

'तुझे पता है ना कि मेरे पास एक ही डिबिया है जो मैं रात होने पर घर के अंदर जलती हूँ'-मंगलो ने हाथ हिलते हुए कहा।

'अच्छा! दूसरी डिबिया बनाओगी तुम'-कृष्णा ने समझते हुए कहा।

'हाँ सही समझा! देख इसे मैं इस आले में बाहर रखा करूँगी ताकि बाहर भी उजाला रहेगा रात में और में तेरी राधाा को भी देख लिया करूँगी, ठीक है ना!'- मंगलो ने आले की तरफ इशारा करते हुए, शीशी को वहाँ रखते हुए कहा।

'सही है दादी, बाहर भी उजाला और अंदर भी'-कृष्णा ने मुस्कुराते हुए कहा।

'हूँ... अच्छी है ना शीशी!'-मंगलो ने खुश होते हुए शीशी देखते हुए कहा।

'तू देखना दादी एक दिन मैं यहाँ बिजली लगवाऊँगा तो हर तरफ उजाला होगा गाँव में!'-गर्दन हिलते हुए कृष्णा ने दादी से कहा।

'अच्छा जी! बड़ी-बड़ी बातें करने लगा है।'-कृष्णा के बालों को हाथ लगाते हुए मंगलो के कहा।

'सच में दादी और फिर मुझे डिबिया से नहीं पढ़ना पड़ेगा बल्कि बल्ब में पढ़ाई करूँगा शहर के जैसे'-पूरे आत्मविश्वास के सात कृष्णा ने जवाब दिया।

'अब बातें ही करता रहेगा या डिबिया बनाने के लिए क त्तर भी लाएगा'-कृष्णा को शीशी दिखाते हुए मंगलो ने कहा।

'अभी लाता हूँ ढूँढके तब तक तू इसके ढक्कन में छेद कर ले और मिट्टी का तेल भर ले इसमें'-कृष्णा ने मुड़ते-मुड़ते कत्तर को लाने के लिए जाते हुए कहा।

डिबिया, किसी भी शीशी के ढक्कन में छेद करके और उसमें एक छोटी सी कत्तर लगाके बनायी जा सकती थी जो मिट्टी के तेल से जलती थी। इसका उजाला बहुत ज्यादा तो नहीं होता था पर हाँ घर में उजाला बना रहता था जैसे रात में एक छोटा सा चाँद लगा हो। डिबिया के जलने पर लौ से धुँआ निकलता था जिसके कारण आले में ऊपर की ओर अंदर काला हो जाया करता था। मंगलो इस धुएँ से अपने लिए काजल बनाती थी। जैसे ही आले में धुँआ इकट्ठा होकर एक परत सा बन जाता था मंगलो उस परत को उतार कर एक मिट्टी के चिराग में रख लेती थी और जब भी शहर या बेटों से मिलने जाती उसका काजल बनाके आँखों में लगाती थी। मंगलो के राशन कार्ड पर हर महीने पाँच लीटर मिट्टी का तेल मिलता था जो कृष्णा ही लाता था सरकारी दुकान से, जिसका मूल्य काफी कम होता था।

'ये ले दादी, ढूँढ लाया मैं तेरी डिबिया के लिए कत्तर'-मंगलो की ओर कत्तर को बढ़ाते हुए कहा। मंगलो पतासे की कील से ढक्कन में में छेद कर रही थी और ढक्कन पर कील लगाके एक ईंट के टुकड़े से चोट मार रही थी। मंगलो ने छेद करके कृष्णा की तरफ देखा और कत्तर को पकड़ते हुए बोली - 'अरे वाह! ले आया मेरा बिटवा क त्तर'।

'जैसी डिबिया में लगती है वैसी ही लाया हूँ, पिताजी ने जब हमारी पढ़ने वाली डिबिया बनाई थी तो ये कत्तर बच गयी थी'- कत्तर की ओर इशारा करते हुए कहा।

'ले तू शीशी में मिट्टी का तेल डाल, तब तक मैं कत्तर को ढक्कन में लगाती हूँ और हाँ, अंदर से माचिस की डिब्बी भी ले आना इसे जलाने के लिए'-शीशी कृष्णा को देते हुए दादी ने कहा।

डिबिया बनके तैयार हो गयी थी और जलाके भी देख ली थी। दोनों बहुत ुश थे डिबिया बनाके, लग रहा था जैसे दोनों ने कुछ नया बना डाला हो। राधा को रोज की तरह चारा डालके मंगलो अपने लिए खाना बनाने अंदर चली गयी और कृष्णा अपने स्कूल जाने की तैयारी करने के लिए। जाते-जाते कृष्णा ने शाम में आटे का हलवा खाने का भी तय कर लिया था अपनी प्यारी दादी से आि र डिबिया बनवाने में जो मदद की थी। दोनों का ऐसे ही छुट-पुट के कामों में लगे-लगे दिन निकल जाता था। रोज की तरह आज भी शाम में स्कूल से आना और खेल-कूद करने के बाद कृष्णा और लाली डिबिया लगाके पढ़ रहे थे। कभी डिबिया को लाली अपनी ओर खींचती तो कभी कृष्णा अपनी ओर खींचता। इसी खींचा-तानी में डिबिया गिर गयी और कुछ मिट्टी का तेल भी किताब पर लग गया।

'ये क्या किया तूने? मेरी किताब पर ही तेल गिरा दिया'- डिबिया को उठाते हुए कृष्णा ने लाली पर चिल्लाते हुए कहा।

'और खींच ले डिबिया अपनी ओर!'–लाली ने जीभ निकालके चिढ़ाते हुए कहा।

कृष्णा अपनी किताब लेके वहाँ से उठके बाहर आ गया। बाहर गली में उजाला था क्योंकि मंगलो ने अपनी नई डिबिया आले में जलाके लगायी हुई थी। कृष्णा ने मुस्कुराते हुए डिबिया की तरफ देखा और जाके मंगलो के दरवाजे पर ही बैठके पढ़ने लगा। नई डिबिया की लौ मानो जैसे चाँद से सूरज बन गयी थी कि उसका उजाला चारों ओर फैल रहा था। कृष्णा ने अच्छे से अपनी पढ़ाई की और ज्यादा रात होने पर घर आके सो गया। मंगलो की नई डिबिया और राधा का साथ उसे इतना भाया कि उसने ठान ली अब यही आके पढ़ लिया करेगा और लाली भी परेशान नहीं करेगी।

धीरे–धीरे वक्त गुजरता गया और कृष्णा की परीक्षा नजदीक आने लगी। उसने बहुत मेहनत की थी आ र मंगलो की नई डिबिया उसके जीवन का हिस्सा जो बन गयी थी। कुछ महीनों में परीक्षा भी हो गयी और परिणाम भी आ गया। आ रकार कृष्णा ने अच्छे अंकों से दसवीं पास कर ली थी। ुशी में चिल्लाते हुए हाथ में स्कूल से मिली सूचना को लेके कृष्णा सीधे अपनी दोस्त दादी के पास गया।

'ये ले दादी, तेरी डिबिया ने कमाल कर दिया, मैं पास हो गया'–खुशी में चिल्लाते हुए कृष्णा ने मंगलो से कहा।

'खुश रह मेरा बिटवा, ऐसे ही तरक्की कर, खूब नाम कमा और शहर जाके बड़ा आदमी बन जा'– मंगलो ने कृष्णा को दोनों हाथों से पुचकारते हुए कहा।

'हाँ दादी मै पढ़के और बड़ा आदमी बनके एक दिन यहाँ खम्बा लगवाऊँगा, तब तू देखना तेरी डिबिया बिजली का बल्ब बन जाएगी'–हँसते हुए आत्मविश्वास के साथ कृष्णा ने कहा।

'इसी खुशी में तेरे लिए तेरा पसंदीदा आटे का हलवा बनाती हूँ, बैठे खाके जाना, लाती हूँ बनाके'–अपनी छोटी सी रसोई की तरफ बढ़ते हुए मंगलो ने कहा।

आगे की पढ़ाई के लिए कृष्णा को सड़क के किनारे बसे गाँव कमोली में अपने मामा के यहाँ जाना था। उसको बस एक ही बात बार–बार सता रही थी कि उसकी मंगलो और राधा का कौन ख्याल रखेगा। उनकी याद उसे बहुत आएगी और हलवा तो बहुत जो मंगलो उसके लिए बनाती थी। जीवन में आगे बढ़ने के लिए कृष्णा अपनी दादी और राधा से मिलके कमोली चला गया और अपना वादा भी साथ ले गया जो दादी से किया था कि गाँव में बिजली का खम्बा लगवाके मंगलो को बल्ब जलाके दिखाएगा।

कुछ साल बीत गए, मंगलो की तबियत भी नाजुक होने लगी थी। एक दिन तीन–चार सरकारी आदमी मौजी में बिजली लगाने के लिए सर्वे करने आए। गाँव में चारों ओर घूम–घूम के देख रहे थे कि कहाँ पर खम्बा लगेगा। लाली भागते हुए मंगलो के पास आयी और बोली – 'देख दादी वो बिजली वाले लोग आए हैं गाँव में और देख रहे हैं कि कहाँ पर और कितने खम्बें लगायेंगे'। 'कृष्णा आया है क्या? बिजली लगाने'– बिस्तर पर लेती मंगलो ने लाली से पूछा। हनहीं दादी, कृष्णा तो शहर में है ये तो सरकारी आदमी है बिजली वाले'– लाली ने बाहर की ओर इशारा करते हुए कहा।

कृष्णा ने पढ़–लिखकर शहर में एक अच्छी नौकरी पा ली थी और उसी ने बिजली विभाग को पत्र लिखकर मौजी गाँव में बिजली पहुँचाने का आवेदन किया था जिसकी वजह से आज गाँव में बिजली विभाग से लोग आए थे। एक महीने बाद बिजली के खम्बे पूरे गाँव में लग गए थे अब इंतजार था तो बस बिजली के छोड़े जाने का। आज के दिन गाँव में बिजली आने वाली थी और यही सुनिश्चित करने के लिए कृष्णा छुट्टी लेकर गाँव आया था। लेकिन आते ही उसे खबर लगी कि उसकी दोस्त मंगलो आज सुबह ही गुजर गयी थी।

गाँव आते ही कृष्णा सीधा मंगलो के घर आया जहाँ गाँव वाले खड़े थे। मंगलो के बेटे और परिवार मंगलो को घेरे खड़े थे जो अब जा चुकी थी। कृष्णा अपनी दादी को निहार रहा था और याद कर रहा था मंगलो के साथ बीते उसके बचपन को कि तभी खम्बों पर लगे सरकारी बल्ब जल उठे और गाँव बिजली की चमक से दमक उठा। गाँव वाले बिजली के आने पर बहुत खुश थे तो मंगलो के जाने पर दुखी। आ रकार गाँव में बिजली की रोशनी ने कदम रख दिया था पर जिसको कृष्णा दिखाना चाहता था उसको दिखा ना पाया।

'देख दादी! तेरे घर के बाहर बिजली का खम्बा लगा है और बल्ब कैसे दमक रहा है!'– कृष्णा ने आँख में आँसू लिए भरी आवाज में शांत लेटी मंगलो की ओर देखते हुए कहा।

अब कोई डिबिया उस आले में नहीं रखी जाएगी और ना ही आने वाली पीढ़ी उस डिबिया को देख पाएगी। ना ही कृष्णा के बच्चे ये समझ पाएँगे की कैसे कृष्णा ने अपनी रातें उस एक डिबिया की लौ के तले गुजरी है और आज वो सक्षम है तो सिर्फ उसकी प्यारी दोस्त मंगलो की वजह से जिसे वो प्यार से दादी कहता था और जिसका वो बिटवा था।

■■■



Alisha Fatima
B.A. (H) Economics II Year

Alisha Fatima
B.A. (H) Economics II Year

संस्कृतम्

संपादकमंडलम्

- डॉ. ब्रह्मप्रकाशः
- श्री अजीतकुमारः

छात्रसंपादकाः

- मधुमाला
- राहुलकुमारः
- देवव्रतः

विषयानुक्रमणिका

1 **स्वामी दयानन्दः** कृष्णा | 30
2 **वयं सर्वे भारतीयाः** दीक्षा | 31
3 **स्वतन्त्रः भारतदेशः** दीक्षा | 31
4 **मनोरथानामगतिर्न विद्यते** विकासगुप्ता | 31
5 **विश्वस्याधुनिकपर्यावरणसमस्यासु वैदिकी शिक्षा** विभूतिः आर्या | 32-33
6 **गीतम्- अद्य मे रे मित्रविवाहोऽयम् (आज मेरे याद की शादी है)** सूर्यभानयादवः | 33
7 **कस्यां प्रीतिः भवति?** शशिकान्तमिश्रः | 34
8 **मम प्रियः कविः कालिदासः** बैजुकुमारः | 34
9 **शिवपार्वती-संवादः** आशुतोषः | 35
10 **संसारमिदं युद्धक्षेत्रम्** देवव्रतः| 35
11 **सर्वेभ्यः शिक्षिकाभ्यः शिक्षकेभ्यः च समर्पितम्** कशिश शर्मा | 36
12 **कुतः शिक्षारम्भः?** पारुल | 36
13 **परोपकारः** सोयंका पटेल | 37
14 **क्षणशः कणशः चवै विद्याम् अर्थं च चिन्तयेत्** हर्षिता राय | 37
15 **एकविंशी शताब्दी समागता भारते** कौशलपतिमिश्रः | 38
16 **राजा अम्बरीशः** गोविन्दप्रकाशः | 38-39
17 **अस्माकं पर्यावरणं औद्योगिकक्रान्तिश्च** प्रवीणकुमारपीयूषः | 39
18 **हास्यकणिकाः** तारकेश्वरः| 39
19 **महात्मा हंसराजः** प्रिया द्विवेदी | 40
20 **आदर्शवाक्यानि** देवाशीषवर्म | 40-41
21 **भारतीय-गौरवम्** पिन्टूकुमारः | 41
22 **जनतन्त्रस्य वैशिष्ट्यम्** मधुमाला | 41-42
23 **हे ईश्वर! मन्न्यायोऽपेक्षितः** मधुमाला | 42
24 **अमृतं संस्कृतम्** राहुलश्यामनटराजन् | 43
25 **जीवनम् एकम् अन्वेषणम्** अभिषेकपाण्डेयः | 43
26 **'लक्ष्य-अन्वेषणम्'** संदीपजायसवालः | 44
27 **कर्त्तव्य-पालनम्** लक्ष्मणकुमारः | 44
28 **रे हृदय! कष्टम् (ऐ दिल है मुश्किल)** राहुलकुमारः | 44-45
29 **वीरचिन्त्यं भारतम्** राहुलकुमारः | 45-46-47
30 **सं वो मनांसि जानताम्** राहुलकुमारः | 47-48
31 **स्वेन स्वस्य युद्धम्** निशान्तकुमारः | 48
32 **शिक्षायाः स्वरुपम्** अतुल शुक्ला | 49-50

स्वामी दयानन्दः

— कृष्णा
स्नातकतृतीयवर्षम्, संस्कृतविशेषः

मध्यकाले नाना कुत्सितरीतयः भारतीयसमाजम् अदूषयन् जातिवादकृतं वैषम्यम्, अस्पृश्यता, धर्मकार्येषु आडम्बरः, स्त्रीणामशिक्षा, विधवानां गर्हिता स्थितिः, शिक्षायाः अव्यापकता इत्यादयः दोषाः प्राचीनसमाजे आसन् अतः अनेके दलिताः हिन्दुसमाजं तिरस्कृत्य धर्मान्तरणं स्वीकृतवन्तः। एतादृशे विषमे काले एकोनविंशशतके केचन धर्मोद्धारकाः सत्यान्वेषिणः समाजस्य वैषम्यनिवारकाः भारते वर्षे प्रादुरभवन्। तेषु नूनं स्वामी दयानन्दः विचाराणां व्यापकत्वात् समाजोद्धारणस्य संकल्पाच्च शिखर-स्थानीयः। स्वामिनः जन्म गुजरातप्रदेशस्य टंकारानामके ग्रामे 1829 तमे वर्षेऽभूत्।

बालकस्य नाम मूलशङ्करः इति कृतम्। संस्कृतशिक्षया एवाध्ययनस्यास्य प्रारम्भो जातः। कर्मकाण्डपरिवारे तादृश्येव व्यवस्था तदानीमासीत्। शिवोपासके परिवारे मूलशङ्करस्य कृते शिवरात्रिमहापर्व उद्बोधकं जातम्। रात्रिजागरणकाले मूलशङ्करेण दृष्टं यत् शङ्करस्य लिङ्गमारुह्य मूषकाः लिङ्गार्पितानि द्रव्याणि भक्षयन्ति। मूलशङ्करोऽचिन्तयत् यत् विग्रहोऽयमकिञ्चित्करः। वस्तुतः देवः प्रतिमायां नास्ति।

रात्रिजागरणं विहाय मूलशङ्करः गृहं गतः। ततः एव मूलशङ्करस्य मूर्तिपूजां प्रति अनास्था जाता। वर्षद्वयाभ्यन्तरे एव तस्य प्रियायाः स्वसुर्निधनं जातम्। ततः मूलशङ्करे वैराग्यभावः समागतः। गृहं परित्यज्य विभिन्नानां विदुषां सतां साधूनाञ्च सङ्गतौ रममाणोऽसौ मथुरायां विरजानन्दस्य प्रज्ञाचक्षुषः विदुषः समीपमगच्छत्। तस्मात् आर्षग्रन्थानामध्ययनं प्रारभत्। विरजानन्दस्य उपदेशात् वैदिकधर्मस्य प्रचारे सत्यस्य प्रसारे च स्वजीवनमसावर्पितवान्। यत्र-तत्र धर्माडम्बराणां खण्डनमपि स चकार। अनेके पण्डिताः तेन पराजिताः तस्य अनेकाः मातानुयायिनोऽभवन्।

स्त्रीशिक्षायाः विधवाविवाहस्य मूर्तिपूजाखण्डनस्य अस्पृश्यतायाः बालविवाहस्य च निवारणाय तेन महान् प्रयासः विभिन्नैः समाजोद्धारकैः सह कृतः। स्वसिद्धान्तानां सङ्कलनाय सत्यार्थप्रकाशनामकम् अमरग्रन्थं राष्ट्रभाषायां विरच्य स्वानुयायिनां स महान्तमुपकारं चकार किञ्च वेदान् प्रति सर्वेषां धर्मानुयायिनां ध्यानमाकर्षयन् स्वयं वेदभाष्याणि संस्कृतहिन्दीभाषयोः रचितवान्। प्राचीनशिक्षायां दोषान् दर्शयित्वा नवीनां शिक्षापद्धतिमसावदर्शयत् स्वसिद्धान्तानां कार्यान्वयनाय 1875 तमे वर्षे मुम्बईनगरे आर्यसमाजस्य स्थापनां कृत्वा अनुयायिनां कृते मूर्तरूपेण समाजस्य संशोधनोद्देश्यं प्रकटितवान्। सम्प्रति आर्यसमाजस्य शाखाः प्रशाखाश्च देशे विदेशेषु च प्रायेण प्रतिनगरं वर्तन्ते।

वर्त्तमान समये 32 देशेषु आर्यसमाजः निरन्तरं समाजसेवायां सेवारतः अस्ति शिक्षापद्धतौ गुरुकुलानाम् अनन्तरं डी.ए.वी. (दयानन्द एंग्लो वैदिक) विद्यालयानाञ्च समूहः स्वामिनो दयानन्दस्य मृत्योः (1883 ईस्वी) अनन्तरं प्रारब्धः तदनुयायिभिः। वर्तमानशिक्षापद्धतौ दयानन्दस्य आर्यसमाजस्य च योगदानं सदा स्मरणीयमस्ति। आधुनिकभारते समाजस्य शिक्षायाश्च महान् उद्धारकः स्वामी दयानन्दः।

आर्यसमाजनामकसंस्थायाः संस्थापनेन एतस्य प्रभूतं योगदानं भारतीयसमाजे गृह्यते। भारतवर्षे राष्ट्रीयतायाः बोधोऽपि अस्य कार्यविशेषः, समाजे अनेका दूषिताः प्रथाः खण्डयित्वा शुद्धतत्त्वज्ञानस्य प्रचारं दयानन्दः अकरोत्। स्वामी दयानन्दः महान् राष्ट्रभक्तः, देशभक्तः वेदोद्धारकश्च आसीत्।

- स्वामी समर्पणानन्दः महाभागः स्वामीदयानन्दस्य विषये उक्तवान्- दातारः तु बहवः सन्ति कश्चित् वस्त्रदाता कश्चित् धनदाता कश्चित् ज्ञानदाता परन्तु हे दयानन्दः भवान् तु अस्मै राष्ट्राय अस्य विलुप्तात्मनः दाता अस्ति। हे आत्मद! भवन्तं वारम्वारं नमामि भवन्तं वारम्वारं नमामि।
- महात्मागान्धी यदि राष्ट्रपिता अस्ति तर्हि स्वामिदयानन्दः राष्ट्रपितामहः अन्ति। पट्टाभिसीतारमैया-महोदयः सरदारपटेलः च उक्तवान्- महर्षिदयानन्दः एव स्वतन्त्रतायाः मूलम् स्थापितवान्।
- स्वराज्यशब्दस्य प्रथमोद्घोषकः महर्षिदयानन्दः एव आसीत् - लोकमान्यः तिलकः।
- सत्यं स्वध्येयं निर्मान्तु महर्षिदयानन्दं च स्वादर्शं स्वीकुर्वन्तु - स्वामी श्रद्धानन्दः।

अन्ते एवं लिखामि- इतिहासः न अवगन्तुं शक्नोति भवतः स्वरूपं यत् भवान् मानवता आसीत् अथवा मानवतायाः महाकाव्यम्।

■■■

वयं सर्वे भारतीयाः

— दीक्षा
स्नातकतृतीयवर्षम्, संस्कृतविशेषः

वयं सर्वे भारतीयाः वयं सर्वे भारतीयाः
आस्माकं लक्ष्यम् एकमेव, हा हा हा एकमेव, हो हो हो एकमेव
..... वयं सर्वे भारतीयाः-
काश्मीरस्य धरां राज्ञीं शिरोमुकुटं हिमालयम्
प्राचीनकालतः वयं एताम् रक्तेन पालयामः
देशस्य रक्षार्थं, वयं शस्त्रं धरामः
भिन्नाः-भिन्नाः ताराः सन्ति परं वयं प्रकाशिताः
आहा एकः आहो एकः वयं सर्वे भारतीयाः
मन्दिराणि गुरुद्वाराणि अपि सन्तिः अत्र, अथ मस्जिद अपि अत्र
गिरीजायाः घडियालः कुत्रापि, मुल्लायाः कुत्राचित् अजान
एकमेव अस्मदीय रामः, एकमेव अल्लाह-ताला
रङ्ग-विरङ्ग-दीपकाः वयम्, परं ज्योतिः एकः,
हा हा हा एकः, हो हो हो एकः
वयं सर्वे भारतीयाः।

स्वतन्त्रः भारतदेशः

सूर्यश्चन्द्रस्तत्र यावत्।
स्वतन्त्रभारतदेशस्तावत्।
आर्यो भवतु यवनो वा भवतु
मिलित्वा भारतदेशः।
पुरतः पादः यदा यदा शत्रोः उग्रो भारतदेशः
शान्तः भारतदेशः न भविष्यति।
आच्छादितं तमः यदा अत्र
प्रकाशो भारतदेशः।

■■■

मनोरथानामगतिर्न विद्यते

— विकासगुप्ता
स्नातकप्रथमवर्षम् संस्कृतविशेषः

अत्र सर्वप्रथमं विवेच्यं यत् को नाम मनोरथः का चागतिर्नाम। इच्छा आकांक्षा-स्पृहा-वाञ्छा-लिप्सा-मनोरथाः इत्यपरः प्रतिपादयति। तदनुसारं जीवने सर्वोत्कृष्टमवाप्तुमिच्छा मनोरथः। अगतिरिति शब्दस्यार्थः प्राप्यते अविषय इति। तदनुसारं सूक्तस्यास्य भावोऽयं यद्धीमतां मनोरथानां कृते न कश्चिदविषयो नाम। मल्लिनाथोऽपि कथयति-

मनोरथानां कामानामगतिरविषयो न विद्यते। न हि स्वशक्तिपर्यालोचनया कामाः प्रवर्तन्त इति भावः॥

अहं तु मन्ये यतोहि मनोरथानां कुत्राप्यगतिर्नास्ति तर्हि 'सर्वत्रधावन्ति' इत्यर्थो ग्राह्यः। मन्ये पार्वत्याः कुमारसम्भवमहाकाव्ये अयमेवाभिप्रायः ब्रह्मचारिणं सा कथयति यत्सोच्चैः पदलङ्घनोत्सुका तस्यास्तपस्तदवाप्तिसाधनमिति। प्रायः सर्वे जनाः स्वीयं स्वीयमस्तित्वमुपेक्ष्यापि सर्वोच्चपदमवाप्तुं समुत्सुका भवन्ति। अतः खलु मनोरथानामगतिर्न विद्यते। कुमारसम्भवस्य पञ्चमसर्गे महाकविः कथयति यत्-

क ईप्सितार्थं स्थिर निश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्।

के न जानन्ति यत् मनः एव मनुष्याणां कारणं बन्धमोक्षयोः। मनसो गतिरेव कदाचिदस्मान् गोवाराज्यस्य समुद्रतटं नयति कदाचिच्च सुदूरग्रामस्य तडागे निमज्जयति अतश्च निर्बन्धमिदं मनः। मया कथ्यते यत् किं किं न साधयति कल्पलतेव विद्या तथैव कथनीयं यत्- किं किं न दर्शयति जीवायेदं मनः। मनः एव मनोरथस्य मूलम्। मनः कल्पमपि क्षणीकरोति क्षणं च कल्पमयम्। अशेषं हि जगदिदं मनसो एव विलासः। महोपनिषदि कथितम् यत्-

कल्पं क्षणीकरोत्यन्तः क्षणं नयति कल्पताम्। मनोविलाससंसार इति मे निश्चिता मतिः॥

पर्वते भवत्युत्तुङ्गता न गम्भीरता तथैव सिन्धौ भवति गम्भीरता न चोत्तुङ्गता। वैषम्ये सत्यपि साम्य वर्तते। अलङ्घनीयेति तथैव मन्ये यः कोऽपि जनो भवतु परं मनोरथस्य न कापि सीमा भवति।

क्वचिद् भूमौ शय्या, क्वचिदपि च पर्यङ्कशयनम्, क्वचि-च्छाकाहारी क्वचिदपि च शाल्योदनरुचिः। क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो, मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्॥

किं बहुना परलोकप्रयाणकालेऽपि मनोरथानां गतिरनिर्वचनीयैव भवति। मादृशानां मनोरथानां गतिरियमेव भवतु यत्-

विश्वस्याधुनिकपर्यावरणसमस्यासु वैदिकी शिक्षा

– विभूतिः आर्या
स्नातकोत्तरप्रथमवर्षम् संस्कृतविशेषः

भारतीयऋषिपरम्परायां शुद्धपर्यावरणस्वरूपं स्वस्थं स्पष्टं चाप्नोति। प्रकृति- समाजपरिवेशविषयकं यच्चिन्तनं भारते विहितं, न तद् दुर्घटनाजन्यं अपितु आसीत् स्वस्थ-पर्यावरण-कामना-प्रसूतम्। वैदिकसाहित्ये स्वस्थपर्यावरणस्वरूपं प्राप्नोति। वैदिकी प्रार्थना प्रकृतिसन्तुलनतत्त्वान् बहुधा स्तौति। येष्वर्कस्य स्वानुकूल-प्रतापस्ययाभ्यर्थना, तथाहि पयोधरानुकूलवृष्ट्याप्तकामना **शंनो वातः पवतां शन्नस्तपतु सूर्यः। (यजुर्वेद ३६/१०)** इति कृता। निगमेष्वनार्तसामाजिकपर्यावरणाय स्वस्थगृहस्थाय समाजसन्तुलनाय च **समानो मन्त्रः समितिः समानी (ऋग्वेद १०/१९२/३)** इत्युपदेशं तथा च प्रतिपदं नैतिक शिक्षां प्रददाति। यजुर्वेदस्तु ब्रह्मचारिणः चरित्रशोधनमुद्घोषयति **चरित्रांस्ते शुन्धामि (यजु० ६/१४)** श्रुत्यनुकूलदृष्टौ पर्यावरणं न भौतिकजन्यमपितु मानवीयवृत्तीनां प्रभावः एव अतः तैः मानवज्ञानकर्मेन्द्रियाणां शुद्धये आख्यातं **ओ वाक् च मे आप्यायताम् प्राणश्च मे आप्यायताम्** इति।

पर्यावरणसंघटके मुख्यतया वायुस्थलजलेति मण्डलत्रयं वर्तते, तत्रोपस्थितानि समस्तान्यपि भौतिकरासायानिकानि च तत्त्वानि सम्मिलितानि भवन्ति। एवमुक्तप्रकारेण पर्यावरणं भौतिकजैविकतत्त्वयोः सम्मेलनेन विनिर्मितमिति विज्ञायते। सर्वेऽपि जीवाः स्थलमण्डलाद्भोजनं, जलमण्डलाद्रसं, वायुमण्डलाच्च प्राणं स्वीकुर्वन्ति। अथर्ववेदानुसारं जलवायुरौषधं चैतानि त्रीणि मुख्यपर्यावरणसंघटकतत्त्वानि वर्तन्ते यथा-

त्रीणिच्छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम्। आपो वाता औषधयः तान्येकस्मिन् भुवनार्पितानि॥

(अथर्ववेद १८/७/१७)

अर्थात् पर्यावरणसंघटके तत्त्वविशेषेण गृह्यन्ते **आपो वारि, वाता वायुः, औषधयः वृक्षवनस्पतयश्च।** कथं वा एतेषां विनाशास्तर्हि, पूर्वोक्तं यथा हि मानवोऽयं स्वार्थपूरणाय प्रकृतिं दोग्धि, तेन हि प्रकृत्या जैविकाजैविकसंघटकतत्त्वानां सन्तुलनं विनश्यति। तदेव पर्यावरणप्रदूषणमित्युच्यते। ऋग्वेदीय अरण्यानी सूक्ते वृक्षोपयोगिता प्रदर्शिता-

उत गाव इवादन्त्युत वेश्मेव दृश्यते। उतो अरण्यानिः सायं शकटीरिव सर्जति॥ (ऋग्वेद)

शतपथकारो वृक्षौषधीनां महत्त्वं प्रदर्शयन्नाह **औषधयो वै पशुपतिः।** ऐतरेयब्राह्मणस्तु वृक्षवनस्पतीनेव प्राणं व्याचष्टे **प्राणो वै वनस्पतिः।**

पर्यावरणसंघटकतत्त्वं **'प्राणिनां वारि जीवनम्'** यदि जलं विना जीवनं संभाव्यते तर्हि मंगलग्रहेऽपि जीवनं संभाव्यम्, यतोहि तत्र केवलं जलाभावः। वैदिकसाहित्ये जलस्तुतिः बहुधाप्राप्यते। यथा- **आपो हिष्ठा मयोभुवस्ता...। यो वः शिवतमो...। तस्मा अरंगमाम्... इति। (यजुर्वेद)**

वैज्ञानिकैरनुमीयते यत् तृतीयविश्वयुद्धं जलप्राप्त्यै एव संभाव्यम्। जलाभावे सत्येव अरबदेशेषु पैट्रोल तैलादधिकं मूल्यैः जलप्राप्तिर्भवति। न केवलं जलस्याल्पतापितु जल-प्रदूषणेनापि जनविषण्णता दरीदृश्यते। ऋग्वेदे उच्यते- **आपः सर्वस्य भेजषं।** अर्थात् सर्वरोगनिवारकं जलमिति नद्यश्च लोकमातरः।

नदीनां स्रवणे न तासां मलिनत्वमपगच्छति अतः एवोच्यते वेदे- **सं सं स्रवनतु नद्यः।** सम्प्रति सम्पूर्णभारतवर्षे १५५४ जलबन्धाः सन्ति। तत्र नगराणां मलं, दूषितं जलमपि नालिकाभिः नदीष्वेव प्रवाह्यते तत्प्रतिषेधव्यं यतोहि तैत्तिरीयारण्यककारो ब्रवीति- **नाप्सु मूत्रपुरीषं कुर्यान् ननिष्ठिवेत्। (ऐतरेय ब्राह्मण)** आपस्तम्ब-धर्मसूत्रेष्वपि- **अप्सु च न मूत्रपूरीषे न कुर्यात्तथाष्ठीवन् मैथुनयोः कर्माप्सु वर्जयेत्।**

प्रस्तुतविषये तृतीयसंघटकतत्त्वं वर्तते **'चलन्ति वायुना प्राणाः'** वायुं विना जीवनस्याशा न कथमपि संभाव्यते अतः विषयः प्रमाणान्तरमपेक्षते वायुरिति जिज्ञासितञ्चेत् वाति गच्छति स्थानाद् स्थानान्तरं प्राप्नोति इति 'वायुः' अन्यच्च गन्धयते, हिनस्ति, विनश्यतीति वायुः। जैविकसृष्टिमूलं वायुरिति शतपथकारोवाच- **यो वै प्राणः स वातः।** वैदिकसाहित्ये 'प्राण' इत्युक्त्वा वायो महनीयता स्वीकृता। **अथर्ववेदे-वातो ह प्राण उच्यते।**

किन्तु वर्तमान समये मानवकुशलप्रज्ञोद्भूता ऽत्याधुनिकाविष्कारोत्पन्नः वायुदोषः, यातायातानुसंधाने प्रयुक्तजीवाश्मतैलदहनेनोत्सर्जितधूम्रः, दैनिककर्मणि प्रयुक्तधूम्रः। अन्यप्रसाधनोपक्रमे यथा- काष्ठजन्यवस्तुसज्जायां प्रयुक्तविलयकतैलम्, उशाहादिषु प्रसन्नतायै

प्रयुक्तरासायनिकतत्त्वयुताः स्फोटकाः युद्धप्रचक्रे प्रयुक्तानि अतिविनाशकानि अस्त्रशस्त्राणि, धूम्रपानञ्चेति प्रदूषणैः वायुमण्डलमतीव प्रदूषितं सञ्जातं। १९९८ ई० तमे विश्वनिरीक्षणस्य परिणामे वायुप्रदूषणेन सर्वाधिकाः जनाः भारते अम्रियन्त। प्रतिवर्षं ६ लक्षटन कार्बनडाईऑक्साइड इति वातावरणे उत्सर्जितं भवति, यस्य ३६% भागं भूमण्डलीयतापवृद्धिजनकेन पातालदेशेनोत्सर्ज्यते। ओजोनपरतक्षये सति सूर्यस्य पराबैंगनीरश्मयः पृथ्वीमायान्ति येन चर्मरोगाः वर्धन्ते। ओजोन क्षरणेनैव पृथिव्याः तापं वर्धते। ओजोनक्षरणं सर्वप्रथमास्ट्रेलियादेशस्योपरि अभवत् अतः तत्र सर्वाधिकाः मनुष्याः चर्मरोगैः ग्रस्ताः वर्तन्ते।

उपसंहार- अथर्ववेदस्य ऋषिणा उच्यते यत्- माता भूमिः पुत्रोऽहं पृथिव्याः। अर्थात् अखिलरसमयी धरेयमस्मज्जननी, वृक्षाश्चास्याभूषणानि सुरभिश्च परितः व्याप्नोति, आपश्च सर्वरोगभेषजी। किं वयं स्वमातुरपि आभूषणानि सुरभिं आपश्च न रक्षयेम, अतो हेतोरेव दर्शं दर्शं निर्दिश्त्यते यत् यदि वादे-वादे तत्त्वबोधः करणीयस्तर्हि वृक्षवारिवायूनां रक्षणाय संकल्पो विधेयः यदि काचिन्नीतिः तर्हि वृक्षवारिवायूनां विषये, यदि विश्वबन्धुत्वं केनचिदस्ति तर्हि वृक्षवारिवायूभिः, यदि कोऽपि सत्य-सनातन-धर्मः तर्हि तत्रत्य-वृक्षवारिवायूनां संरक्षणम्।

■■■

गीतम्- अद्य मे रे मित्रविवाहोऽयम् (आज मेरे याद की शादी है)

— **सूर्यभानयादवः**
स्नातकद्वितीयवर्षम् संस्कृतविशेषः

समं धनवता वा
समं निर्धनवता
दूरे भवेद्वा
समीपे वा भवेत्
परं क्वापि भूयाद् मे रे मित्रमदीयम्!
विवाहस्तु भाग्येन संयोज्यते
अद्य मे रे मित्रविवाहोऽयम्- (2)
मित्रविवाहोऽयं मे प्रियवरविवाहोऽयम्
अहा मे रे मित्रविवाहोऽयम्- (2)
भातीदं सर्वकसंसारविवाहोस्ति।
अवसरे रम्यतास्ति,
बहुशुभलग्नमुहूर्तौ
पश्य ननु किमपि सुन्दरं
वरास्यं सौम्यमेतत्।
मनो नर्तितं मुदा मे,
प्रिया संयुता प्रियेण
तथा संयोगो मिलितः
यथा चोलिका चाञ्चलम्
ओ ऽऽऽऽऽ.....
शुचिकलिकया सङ्गे ममोद्यानस्य विवाहोऽयम्।
ओ श्रृणु मे रे हृदयेज!
आसीदेषा ते युवानी
जातारम्भं ह्यधुना, नवतावकजीवनम्
कथं वाव्रज्यत एवम् अहा नर्तय अस्मान्
काले चागम्यमाने, वधूरियन् त्वान्नर्तय
कस्य वै स्वप्नानां षोडशशृङ्गारविवाहोऽयम्।

■■■

कस्यां प्रीतिः भवति?

— शशिकान्तमिश्रः
स्नातकद्वितीयवर्षम् संस्कृतविशेषः

एकदा एकः पुरुषः स्वकीयं नूतनं कारयानं बहु स्नेहेन परिमार्जयित्वा प्रकाशयति स्म। तदैव तस्य चतुर्वर्षीया बालिका पाषाणखण्डेन कारयाने किमपि कर्षणमारब्धवती। कारयाने कर्षणं दृष्ट्वा पिता एतावान् क्रुद्धः अभवत् यत् सः सुतायाः हस्तं आक्षिपति। एतावद्बलेन यस्मात् बालिकायाः अङ्गुल्यः त्रुटिताः जाताः। पश्चात् चिकित्सालये पीडया क्रन्दन्ती बालिका अपृच्छत् -तात! मम अङ्गुल्यः कदा सम्यक् भविष्यन्ति? स्वस्य दोषे पश्चातापं कुर्वन् किमपि उत्तरं दातुं पिता असमर्थः जातः। सः प्रतिगच्छति अथ च कारयाने पादवृष्ट्या स्वक्रोधं प्रकटयति। पुनः तस्य दृष्टिः बालिकया कृते कर्षणे गता। यस्मात् सः स्वपुत्र्याः हस्तम् अत्रोटयत्। तत्र पुत्र्या शिलाखण्डेन **"तात अहं त्वयि प्रीणामि"** इति लिखितमासीत्।

शिक्षा- क्रोधस्य प्रीत्याश्च परिबन्धः न भवति। ध्यातव्यं वस्तुनः प्रयोगाय भवन्ति अथ च मनुष्याः प्रेम्णे भवन्ति। वस्तुतः भवति विपरीतं, जनाः वस्तुषु प्रीणन्ति जनानां च प्रयोगं कुर्वन्ति।

■■■

मम प्रियः कविः कालिदासः

— बैजुकुमारः
स्नातकद्वितीयवर्षम् संस्कृतविशेषः

कालिदासः संस्कृत-साहित्यस्य महाकविः वर्तते। सः विश्वस्य महापुरुषोऽपि विद्यते। तस्य कीर्तिः न केवलं भारतवर्षे अपितु समस्ते संसारे विस्तृता अस्ति।

महाकविः कालिदासः संस्कृत-साहित्ये अतीव लोकप्रियः अस्ति। जनाः तं 'स्वस्व-प्रदेशवासी' कथयन्ति। अस्य महापुरुषस्य स्थितिकालस्य सम्बन्धे विविधानि मतानि सन्ति। केचित् तं गुप्तकाले ई० चतुर्थशताब्द्यां मन्यन्ते। अपरे विद्वांसः कथयन्ति यत् कालिदासः ई० षष्ठ-शताब्द्यां समभवत्। किन्तु विदुषां बहुमतं ई० पूर्व-प्रथम-शताब्द्यां विक्रमादित्यस्य काले स्वीकरोति। महाकवि-कालिदासेन महाकाव्यद्वयं विरचितं कुमारसम्भवं रघुवंशं च।

कुमारसम्भव-महाकाव्ये शिवपार्वत्योः विवाहस्य, कार्तिकेयोत्पत्तेः, तारकासुर-वधस्य च कथा वर्णिता अस्ति। एषा रचना मनोहरा वर्तते। अस्मिन् काव्ये कवेः मान्यता अस्ति यत् वासनाजनितं क्षणिकं च प्रेम दुःखाय एव भवति। वास्तविकस्य स्नेहस्य उपलब्धिः तु तपसा विना न सम्भवति। अस्य अपरं काव्यं रघुवंशं वर्तते। अस्य एकोनविंशतिसर्गेषु रामायणस्य कथानकम् अस्ति। अस्य भाषा अपि सरला सुबोधा च वर्तते। संस्कृत-भाषायाः अनेके ग्रन्थकाराः सुभाषितकाराश्च कालिदासं रघुवंशकार इति नाम्ना एव जानन्ति।

कालिदासस्य शैली अद्वितीया वर्तते। स नीरसम् अप्रसिद्धं च कथानकम् अपि अति रुचिकरं करोति। अनया सर्वतोमुखीप्रतिभया कालिदासस्य विश्वसाहित्ये असाधारणं स्थानं विद्यते। पाश्चात्यविद्वांसः तु अस्य कवेः तुलनां शेक्सपीयर- महाभागेन कुर्वन्ति।

कालिदासेन त्रीणि रूपकाणि अपि विरचितानि मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं च। अभिज्ञान-शाकुन्तलं तु सप्तांकपूर्णं श्रेष्ठं रूपकम् अस्ति। अस्मिन् दुष्यन्तस्य शकुन्तलायाश्च प्रणयस्य वियोगस्य पुनर्मिलनस्य च कथा वर्णिता वर्तते।

कालिदासेन ऋतुसंहारं मेघदूतं चेति द्वयं गीतिकाव्यम् अपि विरचितम्। मेघदूतस्य अनुकरणे तु अनेकानां दूतकाव्यानां निर्माणं जातम्। उपमा कालिदासस्य इति आभाणकम् अतीव प्रसिद्धम् अस्ति। तस्य उपमासु अनुरूपता, सरसता अपूर्वता च विद्यते। अद्यापि कालिदासस्य कृतिषु तादृगेव माधुर्यं वर्तते यादृक् पूर्वम् आसीत्। अत एव एषा भणितिः समालोचकेषु सुष्ठु विद्यते-

पुरा कवीनां गणना-प्रसंगे
कनिष्ठिकाधिष्ठित-कालिदासः।
अद्यापि तत्-तुल्य-कवेरभावात्
अनामिका सार्थवती बभूव॥

■■■

शिवपार्वती-संवादः

— आशुतोषः
स्नातकतृतीयवर्षम् संस्कृतविशेषः

अपर्णाख्या देवी मुदितमनसा सा भगवती,
भवानी रुद्राणी कथयति शिवानी गिरिसुता।
महादेव स्वामिन् धरतु नटवेशं पशुपते,
दिदृक्षुस्ते नृत्यं प्रिय नदतु ढक्कां भव शिव।।१।।
कथं नृत्यान्येवं कथयसि यथा त्वं भगवति,
दिदृक्षुस्त्वं नृत्यं तदपि खलु जानाम्यहमिदम्।
परं चत्वारोऽमी व्यसनविषया भाविन इह,
अतस्त्वं जानीयाः कथमपि न वश्या मम शिवे।।२।।
इदानीं वक्ष्येऽहं सकलविषयं यत् प्रभवति,
सुधाबिन्दुश्चन्द्रात्पतति यदि नृत्याम्यहमिति।
सुधास्पर्शाद्व्याघ्रस्य वसनमु जीविष्यति पुनः,
ममैको शीभ्योऽयं मरति खलु व्याघ्रे भवति च।।३।।
शिरस्तस्थूलास्या अवनिमवनौ ते फणकराः,
मयूरस्तान्सर्पान् झटिति सृदरानत्स्यति तदा।
जटातः गङ्गेयं सरति सरिदावक्ष्यति महीम्,
निजाभिर्धाराभिः क्रियत इयमद्भिः परिवृता।।४।।
यदा कण्ठान्मुण्डः पतति वसुधायां चलति वै,
तदा मुण्डान्दृष्ट्वा त्वमु हि किल नैवात्र भविता।
कथं नृत्यं विद्यापतिसुकविनेत्थं विरचितम्,
प्रयच्छाशीषं मे प्रवदति तवाशुः शिव शिवे।।५।।

■■■

संसारमिदं युद्धक्षेत्रम्

— देवव्रतः
स्नातकद्वितीयवर्षम् संस्कृतविशेषः

युद्धमेव प्राणीनामस्तित्वस्य मूलमस्ति तत्र च सर्वोत्कृष्टः प्राणी मनुष्योऽस्ति। संसारेऽस्मिन् जीवनप्राप्त्यर्थं युद्धं, जीवनस्थैर्यार्थं युद्धं, आत्मसम्मानार्थं युद्धमित्यादीनि कारणान्येव संघर्ष-मूले सन्ति अत एव संसारमिदं युद्धक्षेत्रमस्ति। संसारेऽस्मिन्नेषा वार्ता तु दृष्टिगोचरतामाप्नोति यद् ये साधवः सरलाश्च ते अकालमेव दिवमाप्नुवन्ति। ममानुसारेण तैः इदं न ध्यातं यद् "छिद्यन्तिसरलास्तत्र कुब्जास्तिष्ठन्ति पादपाः" अर्थात् यथा वनेषु ये पादपाः सरला भवन्ति तान् सर्वप्रथमं मनुष्यः स्वार्थपरो भूत्वा उपयोगाय कर्त्तयति तत्रैव च ये कुब्जाः वक्राः पादपाः ते चिरं जीवन्ति तथैवात्र संसारे सरलाः शीघ्रमेव स्वार्थपरायणदुर्जनहस्तेभ्यः उत्पीड़िताः भवन्ति। अतः सरलता तावदेव शोभते यावद् दुर्जनस्य सम्मुखीकरणं न भवेत् तदनन्तरं तु "शठे शाठ्यं समाचरेत्।"

युद्धे यथा शोकं दुःखं च परित्यज्य पुरस्सरो भाव्यमेव तथैवात्र जीवने अपि जीवन लक्ष्यप्राप्त्यर्थं सर्वदैव प्रयतितव्यम्। यथा युद्धे सह-योद्धा यदा यमग्रासो भवति तदा योद्धा क्षणमेकं शोकं कृत्वा विजयलक्ष्यं प्रति प्रवृत्तो भवति तथैवात्र जीवनेऽपि स्वजनाः दिवं गच्छन्ति परमस्माभिः योद्धामिवास्थिरता विधेया। जीवने असफलताः लभन्ते परमात्मानं कदापि न घातयेत यथा श्रेष्ठः राजा सर्वस्वं परित्यज्य आत्मानं रक्षति सः जानाति यदहं पुनः प्रयत्नं कृत्वा सर्वस्वं च पुनरवाप्स्यामि तथैवात्र उक्तञ्च "आत्मानं सततं रक्षेद् दारैरपि धनैरपि"।

सर्वप्रथमं तु अस्माभिः निर्बलं नैव भाव्यं यतोहि निर्बलता शापमिवास्ति। इत्यत्र अस्मान् कश्चित् शापं न यच्छति उत वयं स्वयमेव शापग्रसिताः भवामः। एतदर्थं वयं स्वयमेव शापमुक्ताः अपि भवितुं शक्नुमः परं तदापि नैव मुक्ताः भवामः चेत् "यत्ने कृते यदि न सिध्यति कोऽत्र दोषः" सर्वस्वमिदं यद् सज्जनाः बलशालिनः भवेयुः तदैवोद्धारं शक्यमुक्तञ्च "वीरभोग्या वसुन्धरा।"

■■■

सर्वेभ्यः शिक्षिकाभ्यः शिक्षकेभ्यः च समर्पितम्

— कशिश शर्मा
स्नातकप्रथमवर्षम् संस्कृतविशेषः

किम् अस्ति तत् पदम्
यः लभते इह सम्मानम्
किम् अस्ति तत् पदम्
यः करोति देशानां निर्माणम्
किम् अस्ति तत् पदम्
यत् कुर्वन्ति सर्वे प्रणामम्

किम् अस्ति तत् पदम्
यस्य छायायां प्राप्तं ज्ञानम्
किम् अस्ति तत् पदम्
यः रचयति चरित्रं जनानाम्
'गुरुः' अस्ति अस्य पदस्य नाम
सर्वेभ्यः गुरुभ्यः शतशः प्रणामः।

■■■

कुतः शिक्षारम्भः?

— पारुल
स्नातकतृतीयवर्षम् संस्कृतविशेषः

प्रश्नाः सम्भवन्ति चेत् उत्तराणि अपि भवन्ति एव। शिक्षारम्भः कदा? सा का? कीदृशी च? इति प्रश्नस्य उत्तरं सहजम् अस्ति यत् शिक्षारम्भः तु बालस्य दुग्धपानात् पूर्वमेव भवति। गर्भाधानात् पूर्वमेव माता-पिता च सन्तानविषये यादृशं सङ्कल्पं कुरुतः तादृशम् एव परिणामं धारयित्वा सन्तानस्य उत्पत्तिः भवति।

मुखं शिशुना देवदत्तं लब्धम्। बुभुक्षा अपि देवदत्ता लब्धा किन्तु बुभुक्षा-निवारणं केन प्रकारेण करणीयम् इति शिशोः स्पष्टा कल्पना न भवति। शिशुः प्रयत्नपूर्वकं केवलं रोदनं करोति। ततः जननी एव महत्या प्रीत्या नवजातं शिशुं दुग्धपानं शिक्षयति। यद्यपि ततः पूर्वमपि शिशोः बहु किमपि देवदत्तं शिक्षणं प्रचलति एव। तदन्तरं व्यवस्थया अव्यवस्थया वा मातृभाषया, परिवेशभाषया वा बालशिक्षायाः शनैः शनैः विकासः भवति। या व्यवस्था भवति सा तु लोके स्वयं प्रचलति किन्तु एतया शिक्षया परिवेशिकः ग्राम्यः वा सन्तोषः भवति। एतस्य सर्वस्य शैक्षणिकविस्तारं तु शिक्षा-विशेषज्ञाः एव कुर्वन्ति। यतः शिक्षा-विशेषज्ञानां विशाला दृष्टिः महत् हितचिन्तनं च भवति अतः ते विशेषरूपेण चिन्तयन्ति हितचिन्तनं यत् शिक्षायाः विकासः बाल्यकालात् एव कथं भविष्यति? युक्ति-रीति-नीति-उपाय-आदि माध्यमेन ते शिक्षाविषये विचारयन्ति, योजयन्ति, प्रवर्तयन्ति च। अबोधाः बालाः अपि कथं बोधनीयाः, प्रेरणीयाः, प्रसादनीयाः उत्साहनीयाः चेति। अनेकान् दुरुहविषयान् बालशिक्षाविषये विचारयन्ति। यतः सर्वेषां हितं कल्याणं वा ते आरम्भे एव चिन्तयन्ति। एतादृशाः बहवः बालशिक्षाविशेषज्ञाः देशे, विदेशे च यथास्थिति बहु कार्यं कृतवन्तः। भारते वैदिक-आयुर्वेद-ग्रन्थेषु काश्यपसंहिताकारः महर्षिकश्यपः 'कौमारभृत्यम्' नामक ग्रन्थे अनेक-बालोपयोगिविषयानां वर्णनं करोति। यद्यपि एतस्य विस्तृतः परिचयो न लभ्यते तथापि ग्रन्थदर्शनेन ज्ञानं भवति यत् बालशिक्षा, बालचिकित्सा, बालक्रीडा, बालमनोविज्ञानम् इत्यादिविषये आचार्यकश्यपः दृष्टिसम्पन्नः एव यथा कश्यपसदृशाः भारतीयाः आचार्याः बालशिक्षाविशेषज्ञाः तथा बहवः वैदेशिकाः अपि सन्ति। तेषां विषये ज्ञानम्, परिचयः अनुकरणम्, अनुगमनं च आवश्यकम्? अतः तादृशानां बालशिक्षाविशेषज्ञानां विषये ज्ञानस्य प्रचारः प्रसारः अस्माभिः करणीयः।

■■■

परोपकारः

— सोयंका पटेल
स्नातकप्रथमवर्षम् संस्कृतविशेषः

पिबन्ति नद्यः स्वयमेव नाम्भः।

स्वयं न खादन्ति फलानि वृक्षाः॥

नादन्ति सस्यं खलु वारिवाहाः।

परोपकाराय सतां विभूतयः॥

अस्मिन् संसारे परोपकारस्य अनुपमा महिमा अस्ति। अनेन गुणेन नरस्य प्रतिष्ठा वर्तते। स नरः आत्मसन्तोषं लभते। शरीरस्य शोभा चन्दनलेपनेन न, अपितु परोपकारेण भवति।

श्रोत्रं श्रुतेनैव न कुण्डलेन।

दानेन पाणिर्न तु कंकणेन॥

विभाति कायः खलु सज्जनानां।

परोपकारैर्न तु चन्दनेन॥

वयं सर्वत्र पश्यामः यत् प्रकृतिः अपि अस्य परोपकारस्य एवं शिक्षां प्रददाति। फलभारेण समन्विताः वृक्षाः स्वार्थाय न फलन्ति, अपितु तेषां फलानि अन्येषां कृते एव जायन्ते।

परोपकाराय फलन्ति वृक्षाः।

परोपकाराय वहन्ति नद्यः॥

परोपकाराय दुहन्ति गावः।

परोपकारार्थमिदं शरीरम्॥

क्षणशः कणशः चैव विद्याम् अर्थं च चिन्तयेत्

— हर्षिता राय
स्नातकप्रथमवर्षम् संस्कृतविशेषः

मानवः कणानां संचयेन धनवान्, क्षणानाम् उपयोगेन च विद्यावान् भविष्यति। असंख्यानाम् क्षुद्रनदीनाम् जलकणाः सागरे मिलित्वा जलनिधिः जायते तथा हि कणानां संचयेन जनः धनी भवति क्षणानाम् उपयोगेन नरः विद्वान् भवितुम् अर्हति उक्तं चः-

जलबिन्दु-निपातेन क्रमशः पूर्यते घटः।

स हेतुस्सर्वविद्यानां धर्मस्य च धनस्य च॥

आंग्ल-भाषायाम् एका प्रसिद्धा भणितिः अस्तिः-

रणमीयं रोमनगरम् एकस्मिन्नेव न निर्मितम् अस्ति विद्या प्राप्तौ मानवजीवनस्य प्रत्येकं क्षणं हि बहुमूल्यं वर्तते। क्षणाः एव मिलित्वा घटिकाः, घटिकाः संयुज्य होराः, संघट्यः प्रहराः, प्रहरास्तु पुनर्मिलित्वा दिवसाः भवन्ति। दिवसैरेव पुनः मासाः मासैः च वर्षाणि विधीयन्ते।

अन्यानि नष्टानि धनानि पुनः लभ्यानि।

भवन्तु कामं परं नष्टः कालः न पुनरेति॥

उक्तम् हिः-

शनैः कन्था, शनैः पन्था शनैः पर्वतलङ्घनम्।

शनैः विद्या च वित्तं च पञ्चैतानि शनैः शनैः॥

सततम् अभ्यासेनैव विद्या लभ्यते। यथा एकस्मिन् दिवसे मासस्य एकस्य भोजनं खादितुं न शक्यते। (प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति)।

■■■

एकविंशी शताब्दी समागता भारते

— कौशलपतिमिश्रः
स्नातकप्रथमवर्षम् संस्कृतविशेषः

इयम् एक-विंशतिः शताब्दी।
पश्य सखे! आगता भारते।।
श्वानो गच्छति कारयानके
मार्जारः पर्यङ्के शेते।
किन्तु निर्धनो मानवबालः
बुभुक्षितो रोदनं विधत्ते।
अचेतनाः पाषाण-मूर्तयः
वस्त्रसज्जिताः संराजन्ते,
किन्तु दरिद्रो वृद्धोऽशक्तः
शीते वस्त्रं विना कम्पते।।
इयम् एकविंशतिः शताब्दी
पश्य सखे! आगता भारते।।
विद्यालयेषु भवनाऽभावात्
ग्रामे तरुच्छायासु बालकाः,
प्रकृतिनिर्मिते वातावरणे
किं पठन्ति जानन्तु भवन्तः।
परस्परन्ते ते कलहायन्ते
मुहुर्मुहुर् अपशब्दायन्ते,
किन्तु शिक्षकाश्चिन्तारहिताः
तरोरधस्तात् सुखं शेरते।।
इयम् एकविंशतिः शताब्दी
पश्य सखे! आगता भारते।।
क्वचित् समक्षे बैंक-लुण्ठनम्
क्वचित् बलात् बालिकापहरणम्
क्वचित् यौतकार्थं मध्याह्ने
गृहमध्ये नववधू-ज्वालनम्।
इतोधिकं का भवेद् विवक्षा?
दिनेऽप्यत्र नैवास्ति सुरक्षा,
नगरे-नगरे मानव हत्या
मत्कुण-वध-सादृश्यं भजते।।
इयम् एकविंशतिः शताब्दी
पश्य सखे! आगता भारते।।
कुतः गन्तासि कुत आयातः?
का ते जननी? कस्ते तातः?
सत्यं ब्रह्म जगन्मिथ्येति
वेदान्तम् अनुचिन्तय भ्रातः।
वृथा रतिः नश्वरे शरीरे
भज गोविन्दम् इत्युपदिश्य,
रेल विभागो यत्र सहर्षम्
नित्यं मुक्तिपथं दर्शयते।।
इयम् एक विंशतिः शताब्दीः
पश्य सखे! आगता भारते।।

■■■

राजा अम्बरीशः

- गोविन्दप्रकाशः
स्नातकप्रथमवर्षम् संस्कृतविशेषः

अम्बरीशमहाभागः सप्तद्वीपस्य अधिपतिः आसीत्। सः श्रीकृष्णस्य परमभक्तः अभवत्। तस्य चित्तं पूर्णतया श्रीकृष्णपदारविन्दयोः निरन्तरं संलग्नं भवति स्म। मुखं श्रीकृष्णस्य गुणवर्णनार्थे, करौ मन्दिर-मार्जनार्थे, कर्णौ भगवद्कथा-श्रवणार्थे आस्ताम् भगवतः सम्पूर्णां सेवां, भूपतिः आसीत्, तदापि, स्वयं करोति स्म। तस्य सर्वं ज्ञानं, कर्म, ज्ञानकर्मेन्द्रियाणि च भगवद्सेवार्थम् आसन्। भगवतः भोगप्रसादम् अपि सः स्वयं पाचयति स्म। अपि तु भोगरचनार्थं अपि गोधूम सः स्वयम् एव घर्षति स्म। एकदा, ग्रीष्मकाले, राजा अम्बरीशः पाचनार्थं गोधूमचूर्णं घर्षन् आसीत्। देहेन स्वेदः वहन् आसीत्। तदा, साक्षात् श्रीकृष्णः वृन्दावनबिहारी तत्र आगच्छत्। सः, राजा अम्बरीशस्य प्रेष्ठतः व्यजनं कुर्वाणः आसीत् यदा राजा अम्बरीशः पृष्ठतः अपश्यत्, यत् कः मम व्यजनसेवां कुर्वाणः अस्ति तदा सः श्रीकृष्णम् अपश्यत्। तत्पश्चात्, सः रोदितुम् आरभते। भोः भोः प्रभु! एतत् भवते न शोभते, यत् भवान् एतादृशं कार्यं करोतु भवान् तु मम स्वामी

अस्ति, मम आराध्यः अस्ति। तदा, श्रीभगवान् वदति, इदम् मह्यं न शोभते, परन्तु किम् भवते इदम् शोभते? अयं तु मम स्वाभावः एव अस्ति यत् इमे भक्ताः यथा मां भजन्ते तथा एव अहम् अपि तान् भजामि। अस्य भक्तस्य राजा अम्बरीश सम्पूर्णाः प्रजाः अपि भक्ताः सन्ति। मनुष्यस्य जीवनम् अति दुर्लभम् अस्ति। इदं जीवनं केवलम् भगवद्प्राप्त्यर्थम् अस्ति। इदं तु अवसरः अस्ति। जीवनं तु क्षणभङ्गुरम् अस्ति। अतः बुद्धिमन्तः जनाः यौवनावस्थां अथवा वृद्धावस्थां न प्रतीक्षन्ते। ते तु कुमारावस्थायाम् एव, भगवद्प्राप्ति-हेतोः साधनस्य अनुष्ठानं कुर्वन्ति। यथा धेनवः अनेकाः सन्ति, परन्तु दुग्धेन भेदः न अस्ति तथा एव ईश्वरे अपि भेद न अस्ति। सर्वे सम्प्रदायाः, ज्ञान-योग- उपासना-साधनानां गन्तव्यं केवलम् ईश्वरः अस्ति। सः तु एकः एव अस्ति। एतत् ईश्वरस्य कृपाप्रसादः यत् अस्माकं जन्म मनुष्य रूपेण अभवत्। अधुना अस्माकं कार्यम् अस्ति यत् जीवनं सफलं भवेत्।

■■■

अस्माकं पर्यावरणं औद्योगिकक्रान्तिश्च

— **प्रवीणकुमारपीयूषः**
स्नातकप्रथमवर्षम् संस्कृतविशेषः

अस्मान् परितः यानि पञ्चमहाभूतानि सन्ति, तेषां समवायः परिसरः वा पर्यावरणम् इति पदेन कथ्यते! सन् 1781 तमे वर्षे जेम्स-वार-महोदयः वाष्प-संयन्त्रयस्य आविष्कारं कृतवान्। तदा पश्चिमदेशानां तकनीकी, सामाजिकस्थितिः परिवर्तिता जाता। एतस्मात् कारणात् पश्चिमदेशानां जीवनशैली परिवर्तिता जाता। तत् परिवर्तनं "औद्योगिकक्रान्ति" इति नाम्ना ज्ञायते।

अनया क्रान्त्या बहूनाम् उद्योगानां स्थापना अभवत्। उद्योगस्य कृते इंधनस्य आवश्यकता भवति। ईंधने जीवश्म-ईंधन आदि ईंधनम् अस्ति। जीवाश्मईंधनप्रयोगेन धूमः अपि विशालमात्रायां निस्सरति। धूमः पर्यावरणम् अपि प्रदूषितं करोति। उद्योगस्य यः अवशिष्टः पदार्थः भवति सः जलपारितंत्रस्य अपि क्षयं करोति। विकासशीलाः देशाः बहून् उद्योगान् स्थापयित्वा पर्यावरणस्य क्षयं कृतवन्तः विकासस्य याः नीतयः आर्थिकसमृद्धिं ध्यात्वा निर्मिताः। ताः पर्यावरणस्य विनाशस्य कारणभूताः अभवन्। एताः नीतयः वायु-प्रदूषणं, जलप्रदूषणम् अपि अकुर्वन्। प्रदूषणात् शनैः-शनैः जनाः विभिन्नैः रोगैः ग्रसिताः जाताः।

1970 तमे वर्षे विकासस्य बहवः विशेषज्ञाः अवदन्। केवलम् आर्थिक-विकास एव मानवजीवनस्य विकासः नास्ति। पर्यावरणसंरक्षणमपि एकं महत्त्वपूर्णं कार्यम् अस्ति। पर्यावरणसंरक्षणमपि विकासः एव भवति। तत्पश्चात् अनेकानि आन्दोलनानि बभूवुः। "सुन्दर-लाल-बहुगुणा" इति नाम्नः नेता उत्तराखण्डे प्रदेशे "चिपकोआन्दोलनम्" अकरोत्। ग्रामस्य जनाः आन्दोलनस्य कृते सुन्दरलालस्य नेतृत्वे एकत्रिताः अभवन्। तत्पश्चात् अस्माकं पर्यावरणं सुरक्षितमस्ति। पृथिव्यां जीवनस्य मूलाय पञ्च- महाभूतानि वर्तन्ते। अस्माभिः एतेषां संरक्षणम् करणीयम्।

■■■

हास्यकणिकाः

— **तारकेश्वरः**
स्नातकतृतीयवर्षम् संस्कृतविशेषः

1. पतिः दुग्धं पीत्वा- "अद्यकीदृशं दुग्धम्?"
   पत्नी केसरसमाप्तिः जाता, तदा अहं भवतः "विमल-पान-मसाला" स्थापितवती। "अस्य कणे कणे केसर वर्तते।"
2. बसस्थानके एका युवती प्रतीक्षमाणा आसीत्। एकः युवकः यथा सा दत्तावधाना भवेत् तथा तस्याः समीपं द्विचक्रिकायानेन गतः। किञ्चित् दूरं गत्वा पुनः तस्या समीपं प्रत्यागतः सः युवतीं पृष्टवान्। "अभिज्ञातः अहम्?"
   युवती- न
   युवकः- त्वत्पुरतः तु प्रस्थितः अहं निमेष मात्रपूर्वम्!!
3. युवकः- त्वम् अतीव लावण्यवती असि।
   युवती- ओह प्रियकर!
   युवकः- त्वं तु अप्सरा इव असि
   युवती- सत्यं वा?
   युवकः- आम्।
   युवती- किं कुर्वन् असि अधुना?
   युवकः- परिहासम्।
4. पतिः- अद्य तादृशं चायपेयं निर्मातु यस्य पानेन देहः दोलयेत्।
   पत्नी- वयं महिषदुग्धं प्राप्नुमः न तु नागदुग्धम्।

■■■

महात्मा हंसराजः

— प्रिया द्विवेदी
स्नातकप्रथमवर्षम् संस्कृतविशेषः

महात्माहंसराजस्य जन्म 19 अप्रैल 1864 तमे वर्षे पंजाब-राज्ये 'होशियारपुरजनपदे' बजवारा इति नामके ग्रामे अभवत्। तस्य पितुः नाम चुन्नीलालः आसीत्। सः एकः साधारणव्यक्तिः आसीत्। महात्माहंसराज बाल्यकालात् एव अतीव कुशाग्रबुद्धिः आसीत्। यदा हंसराजः द्वादशवर्षीयः आसीत् तदैव तस्य पितुः देहावसानः अभवत्। तस्य प्रारम्भिकी शिक्षा स्थानीय-विद्यालयात् एव अभवत्। स्नातकशिक्षां सः 'गवर्नमेंट् कॉलेज ऑफ लाहौर' इति महाविद्यालये पूर्णम् अकरोत्। 1954 तमे वर्षे यदा सः स्वभ्रातृ-गृहे लाहौरनगरे अवसत् तदा सः स्वामिदयानन्दस्य सत्सङ्गे गमनस्य अवसरं प्राप्तवान्। स्वामिदयानन्दस्य प्रवचनस्य हंसराजे अतीव स्पष्टप्रभावम् अभवत्। सः समाजस्य सेवाम् एव स्वजीवनस्य लक्ष्यं निर्मितवान्। सः रिक्तसमये निर्धनानाम् कृते पत्राणि पठनं लेखनं च अकुर्वन्।

बाल्यकालात् एव शिक्षायाः कृते तस्य अनुरागः आसीत्। सः शिक्षायाः प्रसारस्य कृते बहूनि कार्याणि कर्तुम् इच्छति स्म, किन्तु एतस्य कार्यस्य कृते धनस्यापि आवश्यकता आसीत्। तस्य आर्थिकी स्थितिः सम्यक् नासीत्। किन्तु द्वाविंशतिवर्षस्य अवस्थायाम् सः डी.ए.वी.विद्यालये प्रधानाचार्यस्य पदे भूत्वा सेवाम् अकरोत्। किन्तु एतस्य कृते सः किमपि वेतनं न स्वीकृतवान्। जीवनस्य शेषकाले सः समाजसेवकस्य रूपे कार्यं कृतवान्।

लाला हंसराजः पंजाबराज्यस्य आर्यसमाजस्य एकः प्रमुखः नेता शिक्षाविद् च आसीत्। पुरातनवैदिकसंस्कृत्याः प्रसाराय सः महर्षि दयानन्दस्य स्मृत्याम् स्वसहकर्मी गुरुदत्तेन सह मिलित्वा 'दयानन्दएंग्लोवैदिक' इति विद्यालयं स्थापितवान्। पञ्चविंशति वर्षेभ्य सः तस्य विद्यालयस्य अग्रे अवैतनिक रूपेण प्राचार्यस्य रूपे कार्यं कृत्वान्।

एवं सः स्वजीवनं राष्ट्रकृते समर्पितवान्। राष्ट्रीयध्वजे अशोक चक्रस्य श्रेयः अपि सः एव लभते। 14 नवम्बर 1938 तमे वर्षे सः शरीरं विहाय ब्रह्मलोके अगच्छत्।

अद्य अनेकानि शिक्षणसंस्थानानि तस्य एव नाम्नि चलन्ति। यथा- हंसराज महिला महाविद्यालयः, जालन्धर् नगरे। हंसराजमहाविद्यालयः, दिल्लीराज्ये इत्यादयः। तस्य महत्त्वपूर्ण-योगदानेन संपूर्णे भारतवर्षे 750 डी.ए.वी. इति संस्थायाः विद्यालयाः महाविद्यालयाः च सन्ति। **'नमामः महात्महंसराजम्।'**

■■■

आदर्शवाक्यानि

— देवाशीषवर्म
स्नातकप्रथमवर्षम् संस्कृतविशेषः

राष्ट्रेऽस्मिन् भारतवर्षे विविधाः संस्थाः प्रचलन्ति, प्रत्येकमपि संस्थायाः किमप्येकं ध्येयवाक्यं भवत्येव हर्षस्यविषयोऽयं यत् अस्मिन् भारतवर्षे अनेकेषु सर्वकारीयेषु गैरसर्वकारीयेषु संस्थासु बहुलरूपेण संस्कृतध्येयवाक्यानि परिदृश्यन्ते, तेषु केषाञ्चन वाक्यानां सङ्कलनमात्राधः क्रियते-

क्रम	संस्था	आदर्शवाक्यानि
1.	भारतशासनम्'	सत्यमेव जयते'
2.	डाकघर-विभागः'	अहर्निशं सेवामहे'
3.	दूरदर्शनम्'	सत्यं शिवं सुन्दरम्'
4.	आकाशवाणी	'बहुजनहिताय बहुजनसुखाय'
5.	भारतीयथल-सेना	'वीरभोग्या वसुन्धरा'
6.	भारतीयजल-सेना	'शन्नो वरुणः'
7.	भारतीयवायु-सेना	'नभः स्पृशं दीप्तम्'
8.	दिल्लीपुलिस	'सेवा अस्माकं धर्मः'
9.	दिल्लीनगरनिगमः	'तमसो मा ज्योतिर्गमय'

10.	भारतीयजीवनबीमानिगमः	'योगक्षेमं वहाम्यहम्'
11.	विश्वसंगठनम	'वसुधैव कुटुम्बकम्'
12.	दिल्ली-संस्कृत-अकादमी	'सरस्वती श्रुतिमहो महोयताम्'
13.	राष्ट्रीय-संस्कृत-संस्थानम	'योऽनुचानः स नो महान्'
14.	दिल्ली-विश्वविद्यालयः	'निष्ठा धृतिः सत्यम्'
15.	केन्द्रिय-विद्यालय-संगठनम्	'तत् त्वं पूषन अपावृणु'
16.	लोक-सभा	'धर्मचक्र प्रवर्तनाय'
17.	अखिल-भारतीय-आयुर्विज्ञान संस्था	'शरीरमाद्यं खलु धर्मसाधनम्'
18.	उच्चतम-न्यायालय	'यतो धर्मस्ततो जयः'
19.	आई.एन.एस. दिल्ली	'सर्वतो जयम् इच्छामि'
20.	विश्वविद्यालय-अनुदान-आयोगः	'ज्ञान-विज्ञान विमुक्तये'
21.	हंसराजमहाविद्यालय	'तमसो मा ज्योतिर्गमय'

■■■

भारतीय-गौरवम्

— पिन्टूकुमारः
स्नातकप्रथमवर्षम् संस्कृतविशेषः

शुभा भाषा प्रिया पुण्या, महामान्या विभातीयम्।
महत्त्वं घोषयत्युच्चैः, पुराणं देववाणीयम्।।
यदीयं गौरवं वेदा सदा गायन्ति सा नूनम्।
अपूर्वा सर्वथा सेव्या, सुधां संवर्षयन्तीयम्।।
पुराणानि प्रशस्तानि, मनोहारीणि भद्राणि।
तथा परमात्म-विज्ञानं, स्वकोषे संवहन्तीयम्।
सर्वभाषातिरम्याणि, चमत्कारीणि भव्यानी।
रसापूर्णानि काव्यानि, समानं सन्धरन्तीयम्।।
यदीयाया हि गीतायाः, समो नो भूतले ग्रन्थः।
अतुल्यं गौरवं स्वीयं, सदेत्थं प्राप्नुवन्तीयम्।।
शुभं रामायणं काव्यं, विचित्रं भारतं भव्यम्।
समेषां भूतये पुंसां, धरण्यां दर्शयन्तीयम्।।
प्राकृतं योग-सम्बन्धं, रहस्यञ्चात्मनो गुह्यम्।
वदन्तञ्चातिगम्भीरं दर्शनौघं धरन्तीयम्।।
परा विद्यापरा विद्या, स्वरूपं विज्ञविज्ञेयम्।
अविद्यायास्तथा रूपं, मुदा विद्योतयन्तीयम।।
शुभं मानं शुभं दानं, शुभं ध्यानं शुभं ज्ञानम्।
शुभं यच्चास्ति विज्ञानं सदा तद् बोधयन्तीयम्।।
विरोधं सर्वभाषाणापाकर्तुं क्षमा सौम्या।
समासं विश्व-भाषाणां, प्रसूभावं भजन्तीयम्।।
महादेवं सदैवैवं, वयं याचामहे नित्यम्।
भवेत् सर्वत्र साम्मान्या, भद्रभावं भरन्तीयम्।।

■■■

जनतन्त्रस्य वैशिष्ट्यम्

— मधुमाला
स्नातकतृतीयवर्षम् संस्कृतविशेषः

जनतन्त्रम् इत्यस्य अपरः नाम लोकतन्त्रम् अस्ति। जनतन्त्रस्य शाब्दिकार्थः जनतायाः हस्तेषु शक्तिः अधिकारः वा। 'जनतन्त्रम्' अयं शब्दः भारतदेशस्य कृते नूतनः नास्ति। ऋग्वैदिककाले सभासमिति-गण-परिषदः इत्याख्याः संस्थाः लोकतन्त्रस्य प्रतिनिधित्वं कृतवन्तः। ऋग्वेदे 'गणतन्त्रम्' इति शब्दः चत्वारिंशत्वारं अथर्ववेदे नववारं च दृश्यते। वार्ता अस्ति यत् देशेऽस्मिन् भूयमानैः अपि अस्माभिः अस्यैव देशस्य तन्त्रस्य विरोधः क्रियते अथवा तद्विषये टिप्पणी क्रियते इदमेव सिध्यति यत् इदं तन्त्रम् सर्वोच्चम् अस्ति नहि इदं कस्यचिदपि अभिव्यक्तेः हानेः कारणम्।

भारतीय-जनतन्त्रम् सर्वोत्तमं मन्यते। अस्य कारणम् अस्ति यत् भारतदेशे मताधिकारप्राप्तजनानां संख्या सर्वाधिका अस्ति। धारा 325, 326 अनुसारेण प्रत्येकं वयस्कः नागरिकः यदि मूढः अपराधी वा नास्ति चेत् तस्य पार्श्वे मताधिकारः अस्ति। अनेन कारणेन ये शासकाः भवन्ति ते जनताभ्यः उत्तरदायकाः भवन्ति एवं च जनतायाः राष्ट्रस्य वा विकासः चिन्तनीयः भवति यतो हि

अग्रिमनिर्वाचने सैव जनता कञ्चन अन्यं शासकं वा चेतुं अर्हति। एवं च स्वदायित्वस्य स्वपदस्य च रक्षणाय अपि जनतायाः विकासः चिन्तनीयः।

अन्येषु तन्त्रेषु पदं तावत् व्यक्तिकेन्द्रितं भवति। येन च सर्वोच्च-पदेषु कश्चन वंशः अथवा केचन विशिष्टाः एवं दायित्वं निर्वक्ष्यन्ति। परं च अस्माकं लोकतन्त्रे तु कश्चन अति सामान्योऽपि भारतस्य सर्वोच्चं पदं अलंकर्तुं प्रभवति। अस्माकं राष्ट्रस्य सर्वोच्चं पदं भवति राष्ट्रपतिरित्यस्य किन्तु जनता तावती शक्तिशालिनी भवति या तत् पदं अलंकुर्वते राष्ट्रपतिमहोदयाय महाभियोगं कर्तुम् अर्हति।

भारतस्य संविधानस्य कुञ्जिका अस्य संविधानस्य प्रस्तावना वर्तते। तत्र इत्थं प्रतीज्ञायते- "हम भारत के लोग, भारत को एक सम्पूर्ण प्रभुत्वसम्पन्न, लोकतन्त्रात्मक गणराज्य बनाने के लिए एतद्द्वारा इस संविधान को अंगीकृत, अधिनियमित और आत्मार्पित करते हैं। इति उक्तम्। ज्ञायते यत् जनतासु एव कश्चन शासकः वर्तते। एवं च जनता शासकयोः अभेदान्वयः। जनतैव कञ्चन शासकं चिनोति। अतः सर्वमपि प्रभुत्वं जनतासु एव भवति।

बहुविधाः आक्षेपाः भवन्ति यत् राष्ट्रेऽस्मिन् अनेके बुभुक्षिताः, रोगपीडिताः, दीनाः च प्रतिदिनं मृत्युं प्राप्नुवन्ति शासकः तेषां कृते किमपि न करोति। यतो हि तादृशा एव केचन तस्मादेव स्थलात् उत्थाय स्वकर्मणा तपसा बलेन च इदानीम् महान्तः विख्याताः सुप्रसिद्धाः वैज्ञानिकाः जाताः। अतः तन्त्रकारणेन एव सर्वमपि दुखं वर्तते इति न वक्तव्यम्। तत्र अस्माकम् अकर्मण्यताऽपि कारणीभूता भवति। लोकतन्त्रेऽस्मिन् यस्य बहुमतं भवति तस्य एव विचारः अंगीकरणीयो भवति। एवं च अस्मिन्नेव विषये भीमरावअम्बेडकरोऽपि उक्तवान् यत्-नहि किञ्चित् तन्त्रं दुष्टं साधुः वा भवति तन्त्रं तु तदपालयित्रीणाम् अनुसारमेव भवति। उक्तमपि च-

गुणाः गुणज्ञेषु गुणाः भवन्ति।
ते निर्गुणं प्राप्य भवन्ति दोषाः॥
हे ईश्वर! मन्न्यायोऽपेक्षितः

■■■

हे ईश्वर! मन्न्यायोऽपेक्षितः

- **मधुमाला**
स्नातकतृतीयवर्षम् संस्कृतविशेषः

सर्वेभ्यो विधिस्सुदृढः समानोऽपेक्षितः
हे ईश्वर! मन्न्यायोऽपेक्षितः
कलङ्कस्ते न्यायालये मे वधो
वद काचिद्धारा मे वधे
पिता मे हन्ता हन्त्री माता मम
चिकित्सकप्रवक्तारौ हन्तारौ च हन्ता त्वं
मरणाय प्रयतन्ते समे समाजिनः माम्
प्रतिमुखमस्ति मत्कृते बधकसम्मुखं
विधिस्ते न्याय्यो मे न कुरुते
कश्चिदधिवक्ता मेऽभियोगो न स्वीकुरुते
एतदर्थम् स्वाभियोगं स्वयमेव स्वीकुर्वे
स्वाभियोगात् व्यवहृतिं कुर्वे
सर्वे क्रन्दन्ति स्ववधेऽहमपि क्रन्द्रिष्यामि
स्वाक्षिभ्यामहं लौहं विद्रविष्यामि
सुखेन न निद्रापयामि **हन्तॄनू** रोदयिष्यामि
विजीर्णेऽपि कस्यचिद् कल्पनायां आयास्यामि
गीतकारस्य गीतं भूत्वा सर्वान् मानवान् विबोधयिष्यामि
गाँधीदयानन्दौ इव कञ्चिच्छूरवीरं कल्पयिष्यामि।
क्वाहमेकाकिनी क्व सर्वे भूताः
ममाबोधबालायाः शत्रुः सर्वे भूताः
दोषः को मम किमभियोगं दण्डयति
संसार इहागमनपूर्वमेव मे संसारं प्रणश्यति
यस्मै पुत्राय कामयसे यदि स एव म्रियते
तर्हि किं कुरुष्व पुत्रेणामुना सह त्वमपि खलु म्रियस्व
किमभियोगाय अमुष्याः बालायाः वर्तते यं जगत्यागमनेऽवरुन्धे।

■■■

अमृतं संस्कृतम्

— राहुलश्यामनटराजन्
स्नातकप्रथमवर्षम् संस्कृतविशेषः

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा भाषाऽस्ति भाषेयं बहुना भाषाणां जननी मता। अस्यामेव भाषायां ज्ञान-विज्ञानयोः निधि सुरक्षितः अस्ति। यथोक्तम्-भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा च।

अस्या भाषायाः वैज्ञानिकतां विचार्य एव सङ्गणकविशेषज्ञाः कथयन्ति यत् संस्कृतम् एव सङ्गणकस्य कृते सर्वोत्तमा भाषा विद्यते। अस्याः भाषायाः वाङ्मयं वेदैः पुराणैः नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धम् अस्ति। कालिदाससदृशानां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम् चाणक्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्यः सिद्धान्तशिरोमणिः अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। संस्कृते यानि अन्यानि शास्त्राणि विद्यन्ते, तेषु खगोलविज्ञानं, वास्तुशास्त्रम्, सङ्गीतशास्त्रम्, रसायनशास्त्रम्, ज्योतिष्शास्त्रं विमानशास्त्रं च उल्लेखनीयम्।

संस्कृतस्य इदं वैशिष्ट्यं वर्तते। यत् अस्याः वाङ्मये विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति। वरिष्ठान् कनिष्ठान् च प्रति अस्माभिः कथं व्यवहर्तव्यम्। इत्यस्य व्यवहारिकं ज्ञानं संस्कृतमेव ददाति। भारत-सर्वकारस्य विभिन्नेषु विभागेषु संस्कृतस्य सूक्तयः ध्येयवाक्यरूपेण स्वीकृताः सन्ति। भारतसर्वकारस्य राजचिह्ने प्रयुक्तं सूक्तिः सत्यमेव जयते सर्वे जानन्ति। एवमेव राष्ट्रीयशैक्षिकानुसन्धान प्रशिक्षणपरिषदः ध्येय-वाक्यं 'विद्ययामृतमश्नुते' वर्तते।

केचन कथयन्ति यत् संस्कृतभाषायां केवलम् धार्मिक साहित्यं वर्तते एषा धारणा समीचीना नास्ति। संस्कृतग्रन्थेषु मानवजीवनस्य विविधाः विषयाः समाविष्टाः सन्ति। अस्याः भाषायाः शास्त्रेषु महापुरुषाणां मतिः उत्तमजनानां धृतिः सामान्यजनानां जीवनपद्धतिः च वर्णिता अस्ति अतः अस्माभिः संस्कृतम् अवश्यमेव पठनीयं येन मनुष्यस्य समाजस्य च परिष्कारः भवेत्। उक्तञ्च-

अमृतं संस्कृतं मित्र
सरलं सरसं वचः।
एकतामूलकं राष्ट्रे
ज्ञानविज्ञान पोषकम्॥

■■■

जीवनम् एकम् अन्वेषणम्

— अभिषेकपाण्डेयः
स्नातकप्रथमवर्षम् संस्कृतविशेषः

जीवनम् अन्धकारमिव यस्मिन् प्रकाशस्य काऽपि आवश्यकता नास्ति॥

यदि भवन्तः इत्थं चिन्तयन्ति तर्हि ईश्वरप्रदत्ते अस्मिन् जीवने भवान् स्वप्नमिव आगच्छति तर्हि अस्मिन् किमपि अशुद्धता नास्ति परम् अस्मिन् अन्धकारे इव जीवने भवान् चिन्तयति कोऽपि मार्गं प्रदर्शयति चेत् अहम् अधुना-अस्मिन् संसारे जेष्यामि। भो मित्र! यदि पथिकस्य प्रतीक्षां करिष्यति तदा त्वम् लक्ष्यं कदा प्राप्स्यसि। अत्यधिकम् अभवत् प्रतीक्षा, इदानीम् अनेन शब्देन सह अग्रे।

यदि एकवारं निश्चयं कृतं तर्हि केवलं अग्रे चल, अग्रे चल। परन्तु एवं सदा स्मरणे भवेत् यत् यदा पराजयस्य आशङ्का आगमिष्यति तदा पराजयस्य चिन्तां विहाय युद्धं करोतु। यदि भवन्तः स्वयं पराजयस्योपरि विजयं प्राप्नुयु तर्हि तदा अवगच्छेत् यत् भवान् लक्ष्यस्य समीपेऽस्ति। किमपि नूतनं कार्यं करणीयम् प्रयासं करणीयम् जीवनस्य प्रयोगशालायां केवलं प्रयासः करणीयः। अरे बान्धवाः। स्वस्य कृते तु सर्वाणि जीवन्ति, कदाचित् अपरस्य कृते जीवित्वा पश्यन्तु!!! कदाचित् मातृभूमेः कृते जीवित्वा पश्यन्तु अत्र कियुत् आनन्दः अनुभूयते।

■■■

'लक्ष्य-अन्वेषणम्'

— संदीपजायसवालः
स्नातकतृतीयवर्षम् संस्कृतविशेषः

त्वं किमर्थं हताशः असि, त्वं किमर्थं निराशः असि।
उतिष्ठ जागृहि लक्ष्यं त्वया एव अन्वेषणीयम्।।
त्वं न तिष्ठ कदापि, नैव भव श्रान्तः कदापि।
कुर्यात् दृढ़निश्चयं, लक्ष्यं त्वया एव अन्वेषणीयम्।।
त्वं किमर्थं हतोत्साहितः असि, विश्वस्य मायाजालेन प्रभावितः।
उतिष्ठ जागृहि निजगुणं पश्यतु, लक्ष्यं त्वया एव अन्वेषणीया।।
त्वं किमर्थं चकितः असि, त्वं किमर्थं समस्यायाम् असि।
उतिष्ठ जागृहि निजसाहसं वर्धतां, लक्ष्यं त्वया एव अन्वेषणीयम्।।
त्वं किमर्थं हताशः असि, त्वं किमर्थं निराशः असि।
उतिष्ठ जागृहि लक्ष्यं त्वया एव अन्वेषणीयम्।।

■■■

कर्त्तव्य-पालनम्

— लक्ष्मणकुमारः
स्नातकद्वितीयवर्षम् संस्कृतविशेषः

कर्त्तव्यपालनम् एव जीवस्य जीवनम् उच्यते। स्वकर्त्तव्यपालनं मानव-जीवनस्य आधारशिला अस्ति। जगतः प्रत्येकं वस्तु स्वस्य कर्त्तव्यस्य पालनं करोति। सूर्यः सर्वदा प्रकाशं ददाति, वायुर्वाति, वृक्षाः प्राणिनां कृते सदा मधुराणि फलानि ददति, पृथ्वी च प्राणिमात्रं धारयति जगति सर्वे स्वकर्त्तव्यस्य पालनं कुर्वन्ति। यथा- भगवद्गीतायां भगवता कृष्णेन प्रतिपादितम् एतद् यद् मनुष्यैः संसारे अवश्यमेव कर्म कर्त्तव्यम्। अकर्मणि कदापि प्रवृत्तिः न कर्त्तव्याः। स्वकर्तव्येन एव जीवनं चलति।

यथा- **नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः। शरीरयात्रापि च ते, न प्रसिद्ध्येदकर्मणः।।**

एवमेव सर्वत्र कर्त्तव्यस्य उपदेशः अस्ति। संसारे अकर्त्तव्यः मनुष्यस्य महाशत्रुः वर्तते, येन मनुष्यः सर्वदा दुःखं कष्टं वा प्राप्नोति। अतः मनुष्येन सदा स्वकर्त्तव्य-पालनं अवश्यं करणीयम्, कर्त्तव्येन विना किमपि न प्राप्नोति। तथैव उक्तम्-

उद्यमेन हि सिध्यन्ति, कार्याणि न मनोरथैः। न हि सुप्तस्य सिंहस्य, प्रविशन्ति मुखे मृगाः।।

स्वकर्त्तव्य-पालनेन एव निर्धनाः धनिनः भवन्ति, अज्ञानिनः ज्ञानवन्तः अकुशलाः कुशलाः, निर्बलाः सबलाः, दीनाः हीनाश्च सर्वविधसमृद्धाः भवन्ति। कर्त्तव्यपालनभावनैयैव महाराजः शिविः कपोतरक्षणार्थं स्वमांसं श्येनाय प्रादात्। महर्षिः दयानन्दः विवेकानन्दः महात्मा गांधी च भारतभूमिहिताय एव स्वजीवनं दत्तवन्तः, अतः सर्वैरपि सदा सर्वदा स्वकर्त्तव्य-पालनं करणीयम्।

रे हृदय! कष्टम् (ऐ दिल है मुश्किल)

— राहुलकुमारः
स्नातकतृतीयवर्षम् संस्कृतविशेषः

त्वं यात्रा मम
त्वमेव मे लक्ष्यम्
त्वां विना जीवनम्
रे हृदय! कष्टम्
त्वं मम ईशः
त्वमेव प्रार्थनायाम्
त्वां विना जीवनम्
रे हृदय! कष्टम्
मां परीक्षते तवानुपस्थितिः
त्वाम् अपेक्षते मे प्रति असिद्धिः
संकल्पोऽस्ति मम
भवेयं ते योग्यम्
त्वां विना जीवनम्
रे हृदय! कष्टम्
आत्मा अयं मम
शरीरम् इदं मम
तावत् मम नाभूत्

यावत् अभूत् तव
त्वं याम् अदाः सा पीड़ा एव किल
त्वत् हि लब्धा तु
पुरस्कारम् अस्ति मे
मम नभः पश्यति तव भूमिम्
त्वाम् अपेक्षते मे प्रति असिद्धिः
भूमौ तु न खलु
तु नभसि मां मिल
त्वां विना जीवनम्
रे हृदय! कष्टम्
मन्ये अहं तव उपस्थितेः
इदं जीवनं पूर्णं मे
जीवनस्य अपरं नान्यदुपायम्
न हृदयं मम जानीते

त्वां कीयद् बहु प्रीणामि
वरं तु भवेःत्वमज्ञ
न अपेक्षते खलु गन्तव्यम्
एकपक्षीया यात्रा मम
यात्रा शोभनास्ति लक्ष्यतः
त्वाम् अपेक्षते मे प्रति असिद्धिः
अपूर्णं भूत्वापि
मे अस्ति प्रेम पूर्णम्
त्वां विना जीवनम्
रे हृदय! कष्टम्
चलचित्रम् : ए दिल है मुश्किल
अनुदितं गीतम् : ए दिल है मुश्किल

■■■

वीरचिन्त्यं भारतम्

— राहुलकुमारः
स्नातकतृतीयवर्षम् संस्कृतविशेषः

भारतमातरं नत्वा नाटकं रचयाम्यहम्।
स्मरामि वीरपुत्रान् तान् यैः देशो मम रक्षितः॥

(नान्द्यन्ते)

ततः प्रविशति नट्या सह सूत्रधारः

सूत्रधारः- आर्ये! स्वर्गे इदं किं जायमानम् अस्ति। अस्माकं देशस्य स्वतन्त्रतायोद्धारः शोकमुद्रायां किमर्थम् उपविष्टाः सन्तिः।

नटी - आर्य! ईदृशं नैराश्यं स्वर्गे मया कदापि न दृष्टम्।

(नेपथ्ये)

हा! हा! हा!

सूत्रधारः- आर्ये! त्वयि विज्ञापनव्यस्ते कः एषः हसति?

नटी - (नेपथ्यम् अवलोक्य) अये! एषः ब्रिटिशाधिकारी किमर्थं हसन् अस्ति?

(इति निष्क्रान्तौ) (प्रस्तावना)

प्रथमं दृश्यम्
(स्वर्गे)

ब्रिटिशाधिकारी- (हसन्) हा! हा! हा! हा! पश्यन्तु। भवन्तः पश्यन्तु। स्वकीयस्य भारतदेशस्य स्थितिं पश्यन्तु। यस्य कृते भवन्तः आजीवनं संघर्षं कृतवन्तः, कष्टम् अनुभूतवन्तः, प्राणमपि त्यक्तवन्तः। तं भारतम् अद्य पश्यन्तु, देशस्य च अस्य युवकान् पश्यन्तु।

द्वितीयं दृश्यम्
(मदिरालये)

युवानः - (मदिराकूपीं गृहीत्वा, मदिरां पिबन्तः, गीतं गायन्तः)
करिष्यामि मदिरापानम्। करिष्यामि मदिरापानम्...

युवत्यः - (धूमपानं कुर्वत्यः, गीतं गायन्त्यः)
मम प्रेम प्रेम प्रेम धूमपानम्...

तृतीयं दृश्यम्
(चायपानस्थले)

प्रथमो युवकः – (समाचारपत्रं पठन्) पश्यतु भ्रातः। अयं पाकिस्तानदेशः पुनः छलेन अस्माकं सैनिकान् हतवान्। अयं खलः सर्वदा प्रपञ्चं करोति।

द्वितीयो युवकः – (समाचारपत्रं पठन्) अरे भ्रातः। किमर्थं व्यर्थसमाचारं पठति। सैनिकाः मरणाय एव जीवन्ति। अस्माभिः किं करणीयम्। अद्य चत्वारः मृताः जाताः। श्वः इतोऽपि पञ्च मरिष्यन्ति। का नो हानिः?

त्यजतु तत्, पठतु एतत्। विराटः इटलीदेशं गत्वा अनुष्कया सह विवाहं कृतवान्।

प्रथमो युवकः – (स्वकीयं समाचारपत्रं क्षिपन्) कुत्र कुत्र माम् अपि दर्शयतु।

चतुर्थं दृश्यम्
एकस्मिन् स्थले

(केचन युवकाः दुर्घटनाकारणात् अर्धमृतस्य जनस्य सहायतां न कुर्वन्ति अपितु स्वदूरवारण्या चित्राणि आकर्षन्ति अपि च सामाजिकसूचनातन्त्रे एवं विषयं प्रसारयति) 'दुःखम् अनुभवामि दुर्घटनास्थले'...

(केचन हिन्दूयुवकाः मुस्लिमयुवकाश्च परस्परं धर्मनाम्ना कलहं कुर्वन्ति)।

एकः – एते धूर्त्ताः,

अपरः – शत्रवः एते अस्माकम्

पञ्चमं दृश्यम्
(स्वर्गे)

ब्रिटिशाधिकारी – दृष्टवन्तः सर्वे! स्वकीयां स्वर्णचटकाम्। किं जातम् आजादः? अद्य भवतः वज्रवक्षः सकुञ्चितः दृश्यते। रानीलक्ष्मीबाई! कुत्र अस्ति भवत्याः मुखतेजः? भगताश्फाकौ! अद्य भवतोः तीक्ष्णनेत्रभृकुटयः न दृश्यन्ते।

चन्द्रशेखराजादः – अहं तु स्तब्धोऽस्मि सम्प्रति। किं वा वदेयम्। न अवगम्यते मया किम् एते ते जनाः सन्ति येषां कृते वयम् आत्मानं हतवन्तः। किन्तु अद्य मया यत् दृश्यते तदनन्तरं तु स्वर्गेऽपि आत्मान् हन्तुम् इच्छामि।

रानीलक्ष्मीबाई – मम मुखतेजः अस्माकं देशस्य युवतीभिः मदिरायां निमज्जितम्। अहं बाल्यकालात् बहु वारं युष्मान् पराजितवती। दुःखम् इदमस्ति अहं रणक्षेत्रे पुरुषतुल्या आसम् किन्तु इदानीं युवत्यः मदिरालये पुरुषतल्याः सञ्जाताः। रक्तं प्रवाहितं अस्माभिः ताभिः मदिरा प्रवाहिता। ताः स्वातन्त्र्यं विस्मृत्य स्वच्छन्दीभूत्वा पतिताः। अधिकाराणां विषये तु वदन्ति स्वीयं कर्त्तव्यं न अवगच्छन्ति एताः।

भगतसिंहः – तीक्ष्णनेत्रभृकुटीं त्यजतु धर्मनाम्नि कलहं कुर्वतः एतान् युवकान् दर्शनात् वरं यद् अहं नेत्रहीनोऽभविष्यम्। अहं सिखोऽस्मि अश्फाकः इस्लामधर्मानुयायी च अस्ति। वयं कदापि धर्मकारणात् रक्तरञ्जिताः न आस्म। अस्माकं रक्तं तु भारतमातुः समर्पितम् आसीत्।

अश्फाक-उल्लाह-खानः – अद्य पृच्छतु एतान् कोऽस्ति भगतसिंहः? ते वदन्ति वयं केवलं हनीसिंहं जानीमः। पृच्छतु एतान् कोऽस्ति अश्फाक-उल्लाह-खानः? ते वदन्ति वयं केवलं सलामानखानं जानीमः।

ततः प्रविशति नारदमुनिः

नारदमुनिः – नारायण! नारायण! हे भारतमातुः वीरसुपुत्राः! पृथिव्याम् आजीवनं कष्टम् अनुभूय अपि ईदृशाः चिन्तिताः भवन्तः कदापि न दृष्टाः। स्वर्गे भूत्वापि ईदृशं हतस्वभावं कथम्?

चन्द्रशेखरआजाद –हे देव! भवान् तु त्रिलोकेषु भ्रमति। भवता तु सर्वं ज्ञायते यद् अद्य अस्माकं देशस्य युवकानां च कीदृशी स्थितिः जाता। अधुना भवान् एव किमपि करोतु। कथमपि उपायं वदतु।

नारदमुनिः – नारायण! नारायण! हे देशभक्ताः! युवा तु कस्यापि देशस्य मेरुदण्डः भवति। अपि च भारते पञ्चषष्टिप्रतिशतजनसंख्या युवावर्गे

आयाति। किन्तु यत्र युवानः मदिरापानं धूमपानं च कुर्वन्ति। अहर्निशं धर्मनाम्नि कलहं कुर्वन्ति। स्वदेशं प्रति कृतज्ञाः न सन्ति। यत्र महापुरुषाणां शवयात्रायां सहस्रयुवानः चलन्ति किन्तु तेषां पथं केचन एव अनुसरन्ति। यत्र यूनाम् ईदृशी व्यथा तर्हि अस्य देशस्य का कथा?

भगतसिंहः – हे भगवान्! किम् अस्माकं जीवनाहुतिः व्यर्था गाता। किमपि तु भवेद् अस्याः समस्यायाः उपायम्।

नारदमुनिः – एकमेव उपायम् अस्ति।

भगतसिंहः – किम्? किम्? शीघ्रं वदन्तु।

नारदमुनिः – उपायम् अस्ति। शिक्षाप्रणाल्यां संवर्धनम्। भारतस्य कृते आवश्यकम् अस्ति सः स्वकीयं मूलं प्रतिगच्छेत्। येन कारणेन सः विश्वगुरुः आसीत्। भारतीया शिक्षानीतिः ध्वस्ता जाता। शिक्षायां नैतिकता व्यावहारिकता च शनैः शनैः समाप्यते। अस्माकं समृद्धपरम्परायाः पठनं कुत्रापि न भवति। अस्माकं गौरवपूर्णेतिहासस्य पाठनं भवेत्। भारते तु शस्त्रशास्त्रयोः परम्परा आसीत्। मनोशारीरिकं स्वास्थ्यर्थं छात्रान् उद्धर्तुं पाठ्यक्रे योगासनं भवेत्। येन मनोगतविकाराः न उद्भवेयुः। यूनां रक्षणाय देशस्य अस्य विकासाय च मूल्याधारिता शिक्षा भवेत्। अस्माकं संस्कृतिः मूल्याधारिता संस्कृतिः आसीत्। स्वकीयानि मूल्यानि अवाप्य एव देशम् इदं भारतं स्वकीयं गुरुस्थानं प्राप्तु शक्नोति।

(भरतवाक्यम्)

नो भारतस्य देशस्य संस्कृतिः संस्कृताश्रिता।
त्राणाय संस्कृतेर्शिक्षा हि मूल्याधारिता भवेत्॥
इति सर्वे निष्क्रान्ताः

■■■

सं वो मनांसि जानताम्

— राहुलकुमारः
स्नातकतृतीयवर्षम् संस्कृतविशेषः

कश्चन युवा आसीत्। स दिल्लीविश्वविद्यालये पठति स्म। स मूलतः उड़ीसाराज्यतः आसीत्। स उच्चशिक्षायै देहलीम् आगच्छत्। स देहल्यां स्वकीयस्य महाविद्यालयस्य समीपे एकस्मिन प्रकोष्ठे निवसति स्म। स एकवारं डेंगूपीड़ितः जातः। तस्य स्थितिः सम्यक् नासीत्। स बहु पीड़ायाम् आसीत्। तदा तस्य मित्राणि तम् एम्स-चिकित्सालये नीतवन्तः। पितरौ सूचनां प्राप्य शीघ्रमेव उड़ीसातः दिल्लीम् आगतवन्तौ। ततः परं स्वकीयस्य पुत्रस्य उपचारं कारितवन्तौ। स बालकः षड्दिवसान् यावत् चिकित्सालये आसीत्। तदनन्तरं तस्य पितरौ तं तस्यावासे आनीतवन्तौ। अग्रिमदिवसे प्रातःकाले अल्पाहारानन्तरं तस्य पितरौ औषधस्य क्रयणार्थं एम्स-चिकित्सालये गतवन्तौ। स युवा प्रकोष्ठे एकाकी शय्यायां विश्राम्यन् आसीत्। किञ्चित् कालानन्तरं स दूरदर्शनस्य पिञ्जं नून्नवान्। दूरदर्शने समाचारः प्रचलन् आसीत्। तं समाचारं दृष्टवा क्षणेनैव तस्य शरीरे वेगेन कम्पनम् आरब्धम्।

दूरदर्शने समाचार आसीत् यत् एम्स-चिकित्सालये आतंकवादिनः आक्रमणं कृतवन्तः। पञ्चाशत् जनाः हताः शतशश्च व्रणिताः सन्ति। ते आतंकवादिनः अधुनापि चिकित्सालये सन्ति। ते अष्टसंख्याकाः सन्ति। इमं वृत्तान्तं श्रुत्वा तस्य मनसि सन्देहानां सागरमिव उत्थितम्, यतोहि तस्य परिजनौ अपि तत्रैव आस्ताम्। स शीघ्रमेव पितरौ दूरवाणीम् अकरोत्। किन्तु कोऽपि दूरवाणीं न उत्थापितवान्। स लिखितसन्देशम् अपि प्रेषितवान् किन्तु किमपि प्रत्युत्तरं न आगतम्। तदा स क्रन्दनम् आरब्धवान्। पित्रोः प्राणसंकटं कल्पयित्वा स दुःखसागरे पतितः जातः। तत्क्षणे तस्य पीड़ा असहनीया आसीत्। अकस्मात् प्रकोष्ठस्य विद्युतप्रवाहोऽवरुद्धः। विद्युद्भावे स प्रकोष्ठः अन्धकारे निमग्नः। किन्तु मनोशारीरिकस्वास्थ्यकारणात् स वातायनम् उद्घाटयितुम् असमर्थः आसीत्। सहसा स कस्यापि हसनं श्रुतवान्। तत्र कोऽपि जनः आसीत्। तेन कृष्णवस्त्रं धारितम् आसीत्, अन्धकारवशात् तस्य मुखं न दृश्यते स्म। युवकः रुद्धस्वरेण पृष्टवान् 'कोऽस्ति तत्र? हसन् अस्ति?'

मम पित्रोः प्राणाः संकटे सन्ति तथापि भवान् हसन् अस्ति। स जनः उक्तवान् "तर्हि किम् अभवत् एम्स-चिकित्सालये पञ्चाशत् जनाः हताः जाताः। द्वौ इतोऽपि मरिष्यतः। का चिन्ता? मृतसंख्या

पञ्चाशत्तः द्विपञ्चाशत् भविष्यति।" युवा क्रोधेन अवदत् "भवादृशः निर्दयीजनः मया कदापि न दृष्टः। तौ केवल द्वे जने न स्तः। तौ मम पितरौ स्तः। ताभ्याम् अहं पालितः पोषितश्च अस्मि। ताभ्यामेव मम न्यूनाधिकाः सर्वाः आवश्यकताः परिपूरिताः भवन्ति। तयोः अनुपस्थितौ मम भ्रातृणां किं भविष्यति? वयं तु अनाथाः भविष्यामः। भवतः कृते संख्याद्वयम् अस्ति। मम कृते तु तौ मम संसारभूतौ स्तः।" स जनः हसन् अब्रवीत् "हा हा हा हा, भवतः स्मरणे किञ्चित् आयाति किम्? भवान् स एव खलु यः केभ्यश्चित् दिनेभ्यः पूर्वं समाचारपत्रं पठन् स्वमित्रम् अब्रूत यद् केदारनाथतीर्थस्थले आगते महाप्रलये द्विसहस्रपरिमिताः जनाः मृताः जाताः। तदा संख्या सहस्रतः द्विसहस्रं कृता भवता। तदा तु भवान् संवेदनहीनः आसीत्।

यदा विजयदशमीपर्वणि अमृतसरनगरे रेलदुर्घटना अभवत्। तदापि भवतः मनसि किमपि कष्टं न अजायत। यदा केरलप्रदेशे जलप्रलयः आगतः आसीत् तदापि भवान् भावशून्यः आसीत्। केवलं धनदानम् एव भवता कृतम् आसीत्। तस्य जनस्य अनने वचनेन तस्य पीड़ा इतोऽपि वर्धिता जाता। तथापि स पुनः अकथयत् तौ मम पितरौ स्तः। किन्तु तान् जनान् तु अहं जानामि एव न। स जनः उक्तवान् ये जनाः प्रलये दुर्घटनायां वा मृताः जाताः तेऽपि केषाञ्चन मातरः पितरश्च। किन्तु भवान् कदापि तेषां विषये न अचिन्तयत्। भवता यत् महत् दुःखम् अधुना अनुभूयते। तेषां गृहजनैः अपि अनुभूतं किल। किन्तु भवान् समाचारपत्रं पठित्वा एवमेव मा चिन्तयतु यत् मृताः जनाः अपराः कदाचित् ते अपराः स्वीयाः अपि भवितुं शक्नुवन्ति। अस्माकं तु शास्त्राण्यपि भणन्ति-

अयं निज परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

तच्छ्रुत्वा स युवा विचारसागरे निमग्नः। तत्क्षणं अलार्मघट्याः ध्वनि तस्य कर्णविवरेषु प्रविष्टा। पुनः स स्वमातुः ध्वनिं श्रुतवान् यत् पुत्र उत्तिष्ठ! उत्तिष्ठ पुत्र! प्रातःकाल जातः। मया अल्पहारः निर्मीतः। अल्पहारं कृत्वा औषधं स्वीकरोतु। अद्य सायंकाले अस्माभिः रेलयानेंन उड़ीसाराज्यं गन्तव्यम् अस्ति। मातुः एभिः वचोभिः स पुनः जीवितः जातः। इदं तस्य स्वप्नम् आसीत्, अतः स बहुप्रसन्नः जातः। परं स्वप्नेन अनेन तेन युवकेन जीवनस्य महती शिक्षा प्राप्ता। अनेन जागरणेन तस्य जीवने महती जागरुकता समुद्भूता। तेन निजस्य-परस्य च भेदः सम्यक् निरीक्षितः निरीक्ष्य समाप्तश्च। तस्य मनसि समानतायाः महती भावना समुद्भूता। याश्च प्रोक्ताः प्राक्काले ऋग्वेदे-

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते॥

■■■

स्वेन स्वस्य युद्धम्

– **निशान्तकुमारः**
स्नातकतृतीयवर्षम् संस्कृतविशेषः

स्वप्नमिदं नहि यदि तर्हि किम्?
स्वस्मिन्नेव स्वं दृश्ये
किन्तु तथापि कदापि
न द्रष्टुं शक्नोमि स्वस्मिन् स्वम्
हास्यमिदं नहि यदि तर्हि किम्?
स्वप्नेष्वपि भवामि स्वप्नसंसारे सदा
स्वप्नानि तानि भविष्यन्ति सत्यानि
जीवामि इत्यस्मिन्नेव स्वप्ने
स्वप्नलहरीयं नहि यदि तर्हि किम्?

निर्माय स्वेनैव स्वं,
स्वेनैव स्वं मार्जयित्वा,
भवाम्यन्वितस्स्वस्मिन्नेवा
स्वेन स्वस्य युद्धं नहि तर्हि किम्?
जागरितुमिच्छुः परन्तु,
भयमस्ति यत् विनश्यति सर्वम्
करवाणि चेत् किमिदानीम्
स्वेनैव भूत्वा लुप्तोऽम्
प्राप्स्यामि स्वन्नात्रापि संशयः।

■■■

शिक्षाया: स्वरूपम्

— अतुल शुक्ला
स्नातकोत्तर द्वितीयवर्षम्:

मनुष्य: भगवत: सर्वश्रेष्ठ: कृतिरस्ति । समग्रे प्राणिसंसारे मानवमहत्ता शिक्षयैव वर्तते । तथा तु भूतले अनेके प्राणिन: निवसन्ति। परं ते समेऽपि शिक्षा विहीना एव। शिक्षां विना मनुष्य: पशुवत् भवति। शिक्षा एव विद्यारूपेण गृहीता। तत्र उक्तमपि यत्- **विद्याविहीन: पशु:** । शिक्षा एका निरन्तरं प्रचाल्यमाना प्रक्रिया वर्तते। मनुष्य: जन्मन: आरभ्य मृत्युपर्यन्तं शिक्षाग्रहणं करोति। अथ **सा विद्या या विमुक्तये** आसीत् ऋषिसमय: । शिक्षा एव अपगुणान् वारयित्वा सद्गुणानां सञ्चार: अन्त:करणे करोति।

शिक्ष् विद्योपादाने धातुना **गुरोश्च हल:** इति पाणिनीयसूत्रेण **'अ'** प्रत्यये सति **शिक्षा** शब्द: निष्पद्यते । **शिक्षयति या सा शिक्षा । शिक्ष्यते यया सा शिक्षा ।** इति परिभाषा शिक्षाया: विषये प्राप्यते। शिक्षाया: आंग्लभाषायां पदं भवति **Education** इति । **Education** इति शब्द: लेटिन् भाषाया: Educatum, Educare तथा Educere इति पदत्रयस्याधारेणोत्पन्न: इति विदुषां मतम्। तत्र शिक्षाया: प्रमुखं कार्यं भवति- अन्तर्निहितशक्तिनां बहिरानयनमिति।

शिक्षाया: परिभाषा-

१. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। ***(श्रीमद्भगवद्गीता)***

२. मानवान्तर्निहितपूर्णताया अभिव्यक्तिरेव शिक्षा । ***(स्वामिविवेकानन्द:)***

३. स्वस्थे शरीरे स्वस्थं मन: नाम शिक्षा। ***(अरिस्तातिल्)***

४. शिक्षा व्यक्ते: तासां सर्वासां योग्यतानां विकासोऽस्ति याभि: सा स्ववातावरणे परिनियन्त्रणस्य क्षमतां प्राप्नोति स्वसम्भावनाञ्च पूरयति। ***(जान् डीवी)***

स्वस्य सर्वांगीणविकासाय प्राप्यमाणां शिक्षां मनुष्य: परिवारात्, समाजात्, मित्रेभ्य:, प्रकृत्या:, विद्यालयाच्च प्राप्नोति । मनुष्य: प्रतिक्षणं किमपि न किमपि अवश्यं शिक्षति। परन्तु सा शिक्षा अपि त्रिविधा दीयते। **औपचारिकशिक्षा**

यत्र निर्धारितस्थाने निर्धारितसमये निर्धारितेभ्य: छात्रेभ्य: निर्धारितै: अध्यापकै: निश्चितपाठ्यक्रमानुसारं निश्चितविषयस्य शिक्षा प्रदीयते तन्नाम औपचारिकशिक्षा। तद्यथा- विद्यालय:।

अनौपचारिकशिक्षा

अनिश्चितस्थाने अनिश्चितसमये अनिश्चितेभ्य: छात्रेभ्य: अनिश्चितै: अध्यापकै: अनिश्चितपाठ्यक्रमानुसारं अनिश्चितविषयस्य शिक्षा प्रदीयते तन्नाम अनौपचारिकशिक्षेति। तद्यथा- शिविराणि।

निरोपचारिकशिक्षा

यत: छात्रा: स्वयं पठित्वा दृष्ट्वा वा स्वत एव शिक्षां प्राप्नुवन्ति तन्नाम निरोपचारिकशिक्षेति । तद्यथा- अन्तर्जालेन, समाचारपत्रेण, पत्रिकाभ्य:।

शिक्षाया: प्रक्रिया

शिक्षाप्रक्रियाया: विषयं चर्चयामस्तर्हि दृष्टिपथमायाति यत् बहूनां शिक्षाशास्त्रिणां बहुविधमतानि सन्ति। यथा- **१. एडम्स**महोदय: शिक्षां द्विमुखीप्रक्रियारूपेण मन्यते । एष: गुरुं शिष्यं च प्रमुखत्वेनाङ्गीकरोति।

२. जानडीविमहोदय: शिक्षां त्रिमुखीप्रक्रियारूपेण स्वीकरोति। एष: छात्रं शिक्षकं पाठ्यक्रमञ्चाङ्गीकरोति।

३. आधुनिकशिक्षाशास्त्रिण: शिक्षां बहुमुखीप्रक्रियारूपेण स्वीकुर्वन्ति।

शिक्षाया: बहुनि कार्याणि सन्ति । तत्र मानवजीवनपरिप्रेक्ष्ये शिक्षाया: कार्याणि पश्यामश्चेदायान्ति केचन प्रमुखा: बिन्दव: । ते यथा-

1. सुनागरिकनिर्माणम् ।
2. व्यक्तित्वविकास: ।
3. सच्चरित्रनिर्माणम् ।
4. मूलप्रवृत्तिनां नियन्त्रणम् ।
5. जन्मजातशक्तीनां प्रगतिशीलविकास: ।
6. आवश्यकताया: पूर्ति: ।
7. आत्मनिर्भरताया: प्राप्ति: ।
8. व्यावहारिकज्ञानप्राप्ति: ।
9. वातावरणेन सह सामञ्जस्यस्थापनम् ।
10. जीवनार्थं सन्नद्धीकरणम् ।

प्राचीनकाले एषा शिक्षा गुरुकुलेषु दीयते स्म । तत्र बटव: गुरुकुले एव स्थित्वा गुरुणां सेवां कुर्वन्त: स्वावलम्बी भूत्वा सर्वाणि आवश्यकानि कार्याणि कुर्वन्त: शिक्षां प्राप्नुवन्ति स्म । ते भिक्षाटनं कृत्वा भोजनं कुर्वन्ति स्म । ते यावत् शिक्षासमाप्तिर्न भवति स्म तावत् गृहं न यान्ति स्म । शिक्षाया: आरम्भे तेषां यज्ञोपवितसंस्कार:, वेदारम्भसंस्कारश्च भवति स्म । पुन: शिक्षाया: समाप्त्यनन्तरं तेषां समावर्त्तनसंस्कार: कृत्वा तेभ्य: गृहस्थाश्रमं प्रति गन्तुमधिकारा: दीयन्ते स्म । तस्मिन् काले शास्त्रैस्साकं शस्त्राणामपि शिक्षा दीयते स्म । ते गुरुणामाज्ञां सर्वोपरि मन्यन्ते स्म । तस्मिन् काले नैतिकमूल्यानां, सामाजिकमूल्यानां, राष्ट्रियमूल्यानाञ्चापि शिक्षा प्रदीयते स्म । तदा आसीत्

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता: ॥

राष्ट्रदा राष्ट्रं मे देहि ॥

मित्रेण चक्षुषा समीक्षामहे ॥

एतादृशी शिक्षा । या: शिक्षा: प्राप्य मनुष्य: स्वोन्नत्यै: साकं समाजस्य राष्ट्रस्य वा उन्नतिमपि कर्तुं सन्नद्धो भवति स्म । परन्तु अस्मिन् काले मानव: लार्डमेकाले पद्धतौ शिक्षां प्राप्य केवलं साक्षर: तु जात: परं मूल्यानामभाव: दरीदृश्यते । मनुष्य: पाश्चात्यसंस्कृतिमाश्रित्य स्वस्य मूल्यानि नश्यति । एतदर्थमेव साम्प्रतिके समाजे दृश्यन्ते अनर्थकानि दुश्चरितानि वा कार्याणि ।

अत: अस्माभि: सा शिक्षा प्राचीनशिक्षा गुरुकुलपद्धतिर्वा आश्रयणीया: । तदैवास्माकं समाजस्य राष्ट्रस्य वा उन्नतिं भवितुमर्हति ।

■■■



Krishna Chaitanya
B.A. (Prog) I Year

Taruneshwar Nikhil

Minal Thawre

Abhishek Nayak
B.A. (H) History III Year



Alisha Fatima
B.A. (H) Economics II Year

English

Editorial Board

- Dr. Prachee Dewri
- Ms. Ruchi Sharma

Student Editors

- Anshuman Yadav
- Smriti Verma
- Srishti Gupta
- Ujjwal Parashar
- Areeb Ahmad
- Shipra
- Soumya Vats,



Index

1 Autumn through the eyes of a mountain girl | 56

2 The Art of Mathematics | 56

3 Dhing | 57-58

4 Gandhi's Ideas on the Need of Value Based Education : An Ethical Reflection | 58-59-60-61-62-63

5 Endnotes | 63-64

6 History: A Vernacular? | 65

7 Those Days are Gone | 66

8 Images from Childhood | 66

9 Starfall | 67

10 Timeless Visions | 67

11 Five tips to a healthy heart | 67

12 Lovers | 68

13 White Hair Wisdom | 68

Autumn through the eyes of a mountain girl

डाली डाली फूलों की, तुझको बुलाए ऐ मुसाफ़िर मेरे उत्तराखंड में।

– **Aarshiya**
Geology Hons Ist Year

Being a mountain girl, a 'pahadan' (to be precise) was never a worrisome issue for me. Indeed it was quite enchanting you see, for I got to witness the fall in its most beautiful form, in the hills of Tehri Garhwal and Kumaon. It is so strange that Autumn is so beautiful, yet everything is dying. You may gain all the experience life has to offer, but I promise you that every Autumn you experience here will be novel, and the most enchanting, even on reliving it a thousand times.

So have you witnessed a fall, so fine?

Well, I have!

The scented cool breeze carrying the smell of sandalwood and burning pines. The white gigantic cherry blossom tree swooning over the terrace of my cottage, with its blossoms gently falling over the floor, decorating it like a wedding altar. The tinkling music of the rustling leaves gushing past my ears. The soft touch of the cold evening breeze on my bare skin, sends shivers down my spine. As the night sky takes over the dusk, I rush to the beautiful stream nearby behind a row of tall pines, maples and chestnuts.

Under the stelliferous sky, I sit on the wooden deck, and stare at these magnificent mountains--the Blue mountains which are a little darker than the night sky. The Purnima moon shines to its fullest, the Himalayan range seems to be draped with a shroud of silver, and everything holds its breath.

■■■

The Art of Mathematics

- Ekansh Jauhari
Mathematics Hons IInd Year

Mathematics is one of the finest of all visual and imaginary art forms. It is more than just a subject. Mathematicians are fine artists, just like dancers, musicians, painters, etc. Since maths is an art form, it is expected to be beautiful and that is exactly where it illuminates itself. Unlike other artists, a mathematician is an abstract expressionist who has innumerable tools, and infinitely large canvas to present his art. Any form of representation of mathematical arts is insufficient, because its beauty can't be seen, heard or felt but only observed and imagined. Interestingly, for others, it's nothing more than a few formulae. Arguably, Euler's Identity is the most beautifully formulated art, which is mathematically equivalent to the Mona Lisa painting.

The art of Mathematics can be extended as a language beyond the realm of words. There are huge markets for mathematics, where Physicists, Chemists, Economists, etc borrow its beauty to beautify their own domains. Math constructs thoughts, and has been pushing human civilisations ahead with its logics and implications since ages. This infinite charm makes mathematics very interesting and tempting, due to which mathematicians tend to immerse themselves in this endless art forever.

■■■

DHING

- Ishani Ahmed Saikia
English Hons IIIrd Year

As the tires tore unwillingly from the smooth gravelled highway, the pits and mounds of the ochre track jostled them into the past. A past passed on, inherited by Nur from her father. A past they made pilgrimage to for the last three years, one in reverence and the other in resignation. Nur noted very early on that inheritance left little space for choice. More so if one was born into it. Just as Nagaon inherited Dhing, unwillingly, unaffectionately, and left it so. There are places that no one talks about, no one but the people who inhabit it. Places unpleasant like a bad memory that people prefer to lock up in a safe and lose the key to. This was one of those places. This was Dhing of Ibrahim's dreams - Dhing where stagnancy crept along the corrugated roofs, leaving corrosion, downwards into the pool of water; Dhing, where something heavy loomed over its people, something that lulled their lives into a pace too slow for the rest of the world. Why were there no colours on the walls? No colours anywhere except green, as even sunlight refused to pierce through the jilted canopy of the bamboos, Sals and Seguns. There were large swatches of sunlit fields, glowing golden with the warmth of the mustard crops. Nur's dismayed eyes found respite and she wondered whether they were a source of comfort for them too? Did it substitute for their lack of all the colours but green?

In those houses lived a barrage of people who would turn out to be her *Khuras, Bordetas* and *Pehis,* each trying to establish familiarity through food and smiles.

"Allah go, Is she your meyi?" an aunt inquired of Ibrahim. Her *tati saree* had lost much of the blue it had, hanging loose around her corpulent frame. Rings of ridges circled the eyes which, though recipient of thousands of images spread through decades of times passed did not lose the essence of life Nur was seldom accustomed to see.

Ibrahim nodded with a knowing smile.

She then went on to quiz Nur, *"Tui janos ami kun?"* Did she know who she was?

Nur gave an uncomfortable smile guilty of something she didn't know.

"Of course you don't. How will she know Ibrahim, if you don't bring her here enough? Remember, we must stay together. In times of difficulty, after all it is one's own people that will help you", chastised the aunt. Nur watched the stranger with eager eyes as she continued scolding her father, finding a part of his life that was absent from hers. She saw history in its most tangible manifestation, and although her father had greyed well into age, there sitting in that plastic chair too small for his comfort she saw the vestiges of the lively young boy he was once, a boy capable of emotions other than anger.

"Why didn't you take your mother along with you?" Nur found herself being asked the question she knew all too enough, the answer to which was ingrained in the roots of her tongue.

"Her students had their exams, she had to stay with them otherwise she would have definitely come."

"Promise me Ibrahim, you'd bring her the next time?" she said and immediately laughed at her optimism. "If you ever come again, that is." She added. As she sensed the end of the conversation, she went on to make chai for all her guests, as they refused to have *bhat.*

Another stranger entered the room, whom her father introduced as her Bordeuta, his distant elder brother. In their familiar talks Nur sensed a bond that didn't accede to the constraints of time and space. They smoothly crossed that span, conversations easily building through them. All this

while Nur was settled nearby on a comfortable chair, wisps of vapour rising from the *laal saah* nestled comfortably in her hand, through which she could see her father talk animatedly about histories she never knew existed. It was in their shared past that Nur found solace, an access to the past she was only a silent spectator to.

"The river's already eaten up Mujakir's home. It's only a matter of time before the market falls prey to its insatiable hunger. Only Allah knows what tragedy is waiting to befall them, so many livelihoods lost!" Uncle sighed, not with any exaggerated pretence of a sudden calamity. This was a lived reality, this was the reason they moved here in the first place he said.

"I am not building up this house any fancier than it is now. I know the river won't pardon us too... only a matter of time... only a matter of time. Ever since the Dhola-Sadiya changed the currents of the river, Luit has ravaged our home. But who cares about the shadows when one tramples over them to progress? Greatness overshadows the little, the weak, the forgotten. How do we, the perennial outsiders even feature in their imagination for development? Development was never meant for all."

The rows of corrugated iron rods, placed inside the window failed to keep the cold outside. It wasn't cold, winter seldom visited from the hills down in the valley now. Just water. Bordeuta filled up the ripples of dried cement on the walls with his words. And in them she saw. It wasn't stagnancy but resilience that Nur saw in the houses, bereft of colour because Luit didn't allow any. Any trace of excess, any celebration of magnanimity was severely punished. Nothing but the green and brown survived.

That evening as the dying embers of daylight fell upon the ancient watery grave, Nur's father pointed out the absent piece of land which was once his home. It was the center of every activity, he said. "We would all sit around a gigantic brass container where our mother would squash an entire bunch of *Bhimkols,* mash them with rice and milk. We ate like monsters, *raikokh'or nisina khaisilu",* he smiled. She wondered how it felt like. To see the whips of Luit carry away his land, piece by piece, until nothing but the air above it remained. As her uncle said, no traces of celebration were exempted. And her father then knew how to celebrate.

■■■

Gandhi's Ideas on the Need of Value Based Education : An Ethical Reflection

- Dr. Satyendra Srivastava
Department of Philosophy

